ॐ

ज्योतिर्वित्केशवभट्ट — काशीनाथशर्माभ्यां

संस्कृता-शोधिता च

इयम्

सहस्रनामस्तोत्रयुक्ता

# कुमारसहस्रनामावली

ॐ

ईस्वीसं० १९५० सप्तर्षिसं० ५०२६

वैक्रमे १९७

परोपकाराय प्राकाश्यं नीता

पुस्तक मिलनेका पताः- ज्यो० काशीनाथ (पुलाद)
टीचर हिन्दी विद्यालय चुन्दुपुरा सुथो श्रीनगर काश्मीर

मूल्यं रु) ॥=

CC-0. Narinder Safaya Collection. Digitized by eGangotri

हमारे श्रेयपुस्तक मिलनेका पत्ता:—

**पं० केशवभट्ट ज्योतिषी पाठशालाटीचर, जिल्ला रैणावरी,**
**महल्लाभाग ज्योगीलङ्गर कश्मीर — श्रीनगर.**


नं० पुस्तकों की पृष्ठाङ्क और पंक्तिअङ्कसहित विषयसूची मूल्यम्

१ नित्यकर्मविधि नं० २ [ प्रथमखण्ड में ] पृष्ट १ पंक्ति १ से, काश्मीरिकैत्रैवर्णाऽश्रमाचारशिक्षा, ५-१, जन्मोत्सवपूज्यदेवतापूजा ५-८, जन्माष्टमीपूजा ५-१६ जयनारायण ६-११, व्याप्तचराचर ७-१० अतिभीषण ८-१ बहुरूपगर्भोपयोगि (स्वच्छन्दध्यानं ) त्रिपंचनयनं देवमित्यात्मकं (२ खण्ड में) १—१ स्नानविधि ७—१२ सन्ध्योपासना २०-६ नैवेद्यमंत्र २३-१६ भोजनविधि २५-४ पञ्चगव्यविधि २७—४ विष्णुपञ्चायतनपूजा ५५—१ गणेशस्तुति ५६-४ गुरुस्तुति ५७—८ गायत्रीलीला ५९-१ गौरीस्तुति ६०—३ मुकुन्दमालात्मकः |—)

२ भवानीनामसहस्रस्तोत्रम् । ६५-१ नामसहस्र व नामावली ८४-१७ इन्द्राक्षीस्तोत्रात्मकम् । |—)

३ विष्णुसहस्रनामस्तोत्रं (८७-१ नामावली ११३—१३ स्तोत्र १२६—६ गोविन्दाष्टक १२७-१० कृष्णलीला १२८-४ 'विश्वेश्वराय' शिवस्तोत्र |—)

४ सहस्रनामावाली । १२९-१ राज्ञीसहस्रनाम १३८-२२ नामावली १५१-१ ज्वालासहस्रनाम १५९—१३ नामावली १६६—१५ शारिकासहस्रनाम १७१-६ नामावली १९०-१ गणेशसहस्रनामावली २०३-१ राज्ञीस्तोत्र २०४-२१ राज्ञीस्तुति २०५-२० ज्वालास्तोत्र २०७-१५ शारिकास्तोत्रात्मकम् ||)

५ आदित्यहृदयम् (२०९-१ गणेशस्तोत्र । २१२—१ सरस्वतीस्तुति । २१४-१ राज्ञीकवच । २१६—१६ आदित्यहृदय । २३१—१ मातृभक्तिस्तुति । २३३-१ राज्ञीस्तोत्र । २३४—१ मातृदेवीलीलास्तुति । २३६-६ अपराजिताविद्या । |)

६ शिवसूर्ययोः सहस्रनामावली (२४१-१ सूर्यसहस्रनामावली । २५०-८ शिवसहस्रनामावली । २५९-६ मरकोत्तारणस्तोत्र । २६?- नारायणकवच २६६-१२ पञ्चमुखहनुमत्कवच २७० -? सूर्यकवच । |)

७ क्षमानुवाक्यम् । ( ३ खण्ड ) १-१ क्षमानुवाक्य —)॥

८ शिवपूजा । ( चतुर्थ खण्ड) १-१ बहुरूपगर्भस्तोत्र । ५-१३ शिवकवच ११-१


CC-0. Narinder Safaya Collection. Digitized by eGangotri

ॐ

पण्डितकेशवभट्टज्योतिर्विदा

संस्कारशोधनाभ्यां सम्पादिता

इयम्

# सचमशिवपूजा ।

मुम्बय्यां

निर्णयसागराख्यमुद्रणयन्त्रालयेऽङ्कयित्वा

श्रीसप्तर्षिसंवत्सरे ५०११ विक्रमवत्सरे १९९२

ईस्वी वत्सरे १९३५

परोपकाराय प्राकाश्यं नीता ।

---

मूल्यं [illegible], 0·65 np

CC-0. Narinder Safaya Collection. Digitized by eGangotri

## हमारे क्रेयपुस्तक मिलनेका पताः—

पं० केशवभट्टज्योतिषी पाठशालाटीचर, जिल्ला रैणावारी, महल्ला भागज्योगीलङ्कार, कश्मीर—श्रीनगर.

१ नित्यकर्मविधिः'नं. १ (स्नानविधि सन्ध्या-नैवेद्यमन्त्र-भोजनविधि-पञ्चगव्यविधि हिन्दीभाषायां इतिकर्तव्यतासहितः ब्राह्मीविद्या च ) ... ... ... ... ≡)

२ नित्यकर्मविधिः नं. २ (नं, १ विषय, तथा विष्णुपञ्चायतनपूजा-गणेशकवच-गुरु-गायत्री-गौरीस्तुतिमुकुन्दमालासहितः) ... ... ... ... ... ।=)

३ नित्यकर्मविधिः नं. ३ ( नं. २ के विषय तथात्रैवर्ण्यवर्णाश्रमाचारशिक्षा-जन्मोत्सवपूज्यपूजा—जन्माष्टमीपूजा जयनारायण-व्याप्तचराचर-अतिभीषण-बहुरूपगर्भोपयोगि स्वच्छन्दध्यानं च ) त्रिपञ्चनयनं देवमिति ।=)॥

४ शिवपूजा ( बहुरूपगर्भ-महिम्नःपार-शिवकवच-शिवनिर्वाण-व्याप्तचराचर-अतिभीषण-षडक्षर-पञ्चाक्षर-दीनाक्रन्दनशिवापराधक्षमापन-कैवल्योपनिषत्-शिवपूजागणेशस्तवराजात्मका ) ... ... ... ... ।=)

५ गणेशदुर्गास्तोत्रावली (लाक्षासिन्दूर-अद्रिराजज्येष्ठपुत्र एकदन्तमीशपुत्र इति गणेशस्तोत्रत्रय-गणपतिविद्या-देवीध्यानरत्नमाला-शारिकास्तोत्र-ब्राह्मीविद्यात्मिका ) ।–)

६ सौन्दर्यलहरी (पञ्चस्तवीसमेता ) ... ... ... ।–)

७ देवीपूजा (देवीपूजा-राज्ञीस्तुतिः "याद्वादशर्के"-साहिभरुपभवानीवाक्यमञ्जरी-सरस्वतीस्तुतिश्च ) ... ।–)

८ चमानुवाक्यम् ... ... ... ... ... =)

९ रुद्रपञ्चकम् ( रुद्रमन्त्र-चममन्त्र-सौमारुद्र-दीक्षा-शताध्यायात्मकम् ) ... ... ... ... ... ।)

CC-0. Narinder Safaya Collection. Digitized by eGangotri

# बहुरूपगर्भस्तोत्रम् ।

## शिवपूजायाम् ।

ॐ नमः स्वच्छन्दभैरवाय ॥ ब्रह्मादिकारणातीतं स्वशक्त्यानन्दनिर्भरम् । नमामि परमेशानं स्वच्छन्दं वीरनायकम् ॥ १ ॥ कैलासशिखरासीनं देवदेवं जगद्गुरुम् । पप्रच्छ प्रणता देवी भैरवं विगतामयम् ॥ २ ॥ "श्रीदेव्युवाच" प्रायश्चित्तेषु सर्वेषु समयोल्लङ्घनेषु च । महाभयेषु घोरेषु तीव्रोपद्रवभूमिषु ॥ ३ ॥ च्छिद्रस्थानेषु सर्वेषु सदुपायं वद प्रभो । येनायासेन रहितो निर्दोषश्च भवेन्नरः ॥ ४ ॥ "श्रीभैरवः" शृणु देवि परं गुह्यं रहस्यं परमाद्भुतम् । सर्वपापप्रशमनं सर्वदुःखनिवारणम् ॥ ५ ॥ प्रायश्चित्तेषु सर्वेषु तीव्रेष्वऽपि विमोचनम् । सर्वच्छिद्रापहरणं सर्वार्तिविनिवारकम् ॥ ६ ॥ समयोल्लङ्घने घोरे जपादेव विमोचनम् । भोगमोक्षप्रदं देवि सर्वसिद्धिफलप्रदम् ॥ ७ ॥ शतजाप्येन शुद्ध्यंति महापातकिनोऽपि ये । तदऽर्धं पातकं हन्ति तत्पादेनोपपातकम् ॥ ८ ॥ कायिकं वाचिकं चैव मानसं स्पर्शदोषजम् । प्रमादादिच्छया वाऽपि सकृज्जाप्येन शुद्ध्यति ॥ ९ ॥ यागारम्भे च यागान्ते पठितव्यं प्रयत्नतः । नित्ये नैमित्तिके काम्ये परस्याप्याऽत्मनोऽपि वा ॥ १० ॥ निश्छिद्रकरणं प्रोक्तं स्वभावपरिपूरणम् । द्रव्यहीने मन्त्रहीने यज्ञयोगविवर्जिते ॥ ११ ॥ भक्तिश्रद्धाविरहिते शुद्धिशून्ये विशेषतः । मनोविक्षेपदोषे च विलोपे पशुवीक्षिते ॥ १२ ॥ विधिहीने प्रमादे च जप्तव्यं

CC-0. Narinder Safaya Collection. Digitized by eGangotri

सर्वकर्मसु । नाऽतः परतरो मन्त्रो नातः परतरा स्तुतिः ॥१३॥ नातः परतरा काचित्सम्यक्प्रत्यङ्गिरा प्रिये । इयं समयविद्यानां राजराजेश्वरीश्वरि ॥१४॥ परमाऽप्यायनं देवि भैरवस्य प्रकीर्तितम् । प्रीणनं सर्वदेवानां सर्वसौभाग्यवर्धनम् ॥ १५ ॥ स्तवराजमिमं पुण्यं शृण्वष्वाऽवहिता प्रिये ॥ १६ ॥ ("अस्य श्रीबहुरूपभट्टारकस्तोत्रस्य, श्रीवामदेव ऋषिः, अनुष्टुप्छन्दः, श्रीबहुरूपभट्टारको देवता, आत्मनो० चतुर्वर्गसिद्ध्यर्थे पाठे विनियोगः ॥ न्यासं कृत्वा प्राणायामः ॥") वामे खेटकपाशशार्ङ्गविलसद्दण्डं च वीणाण्टिके बिभ्राणं ध्वजमुद्गरौ स्वनिभदे व्यङ्कं कुठारं करे । दक्षेस्यऽङ्कुशकन्दलेपुडमरून्वज्रत्रिशूलाभयान्रुद्रस्थं शरवक्त्रमिन्दुधवलं स्वच्छन्दनाथं स्तुमः ॥ ॐ बहुरूपाय विद्महे कोटराक्षाय धीमहि । तन्नोऽघोरः प्रचोदयात् ॥ ३ ॥ ("मूलं । अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च । सर्वथा शर्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः") १०८, ॐ श्रीभैरवः ॥ ॐ नमः परमाकाशशायिने परमात्मने । शिवाय परसंशान्तनिरानन्दपदाय ते ॥ १ ॥ अवाच्यायाऽप्रमेयाय प्रमात्रे विश्वहेतवे । महासामान्यरूपाय सत्तामात्रैकरूपिणे ॥२॥ घोषादिदशधाशब्दबीजभूताय शम्भवे । नमः शान्तोग्रघोरादिमन्त्रसन्दर्भगर्भिणे ॥ ३ ॥ रेवतीसङ्गविस्रम्भसमाश्लेषविलासिने । नमः समरसास्वादपरानन्दोपभोगिने ॥ ४ ॥ भोगपाणे नमस्तुभ्यं योगीशैः पूजितात्मने । द्वयनिर्दलनोद्योगसमुल्लासितमूर्तये ॥५॥ सरत्प्रसरविक्षोभविसृष्टाऽखिलजन्तवे । नमो मायास्वरूपाय स्थाणवे परमेष्ठिने ॥ ६ ॥ घोरसंसारसंभोगदा-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

यिने स्थितिकारिणे ॥ कालादिक्षितिपर्यन्तपालिने विभवे नमः ॥ ७ ॥ रेहनाय महामोहध्वान्तविध्वंसहेतवे । हृदयाम्भोज-संकोचभेदिने शिवभानवे ॥ ८ ॥ भोगमोक्षफलप्राप्तिहेतुयोग-विधायिने । नमः परमनिर्वाणदायिने चन्द्रमौलये ॥ ९ ॥ घोष्याय सर्वमन्त्राणां सर्ववाङ्मयमूर्तये । नमः शर्वाय सर्वाय सर्वपाशापहारिणे ॥ १० ॥ रवणाय रवान्ताय नमस्ते राव-राविणे । नित्याय सुप्रबुद्धाय सर्वान्तरतमाय ते ॥ ११ ॥ घोषाय परनादान्तश्चराय खचराय ते । नमो वाक्पतये तुभ्यं भवाय भवभेदिने ॥ १२ ॥ रमणाय रतीशाङ्गदाहिने चित्रकर्मिणे । नमः शैलसुताभर्त्रे विश्वकर्त्रे महात्मने ॥ १३ ॥ नमः पार-प्रतिष्ठाय सर्वान्तपदगाय ते । नमः समस्ततत्त्वाध्वव्यापिने चित्स्वरूपिणे ॥ १४ ॥ रेवद्धराय रुद्राय नमस्ते रूपरूपिणे । परापरपरिस्पन्दमन्दिराय नमो नमः ॥ १५ ॥ भरिताखिल-विश्वाय योगगम्याय योगिने । नमः सर्वेश्वरेशाय महाहंसाय शम्भवे ॥ १६ ॥ चर्च्याय चर्चनीयाय चर्चकाय चराय ते । रवीन्दुसन्धिसंस्थाय महाचक्रेश ते नमः ॥ १७ ॥ सर्वानुस्यूत-रूपाय सर्वाच्छादकशक्तये । सर्वभक्षाय सर्वाय नमस्ते सर्व-वेदिने ॥ १८ ॥ रम्याय वल्लभाक्रान्तदेहार्धाय विनोदिने । नमः प्रपन्नदुष्प्राप्यसौभाग्यफलदायिने ॥ १९ ॥ तन्महेशाय तत्त्वार्थवेदिने भववेदिने । महाभैरवनाथाय भक्तिगम्याय ते नमः ॥ २० ॥ शक्तिगर्भप्रबोधाय शरण्यायाऽशरीरिणे । शान्तिपुष्ट्यादिसाध्यार्थसाधकाय नमोऽस्तु ते ॥ २१ ॥ रव-त्कुण्डलिनीगर्भप्रबोधप्राप्तशक्तये । उत्स्फोटनापटुप्रौढपरमाक्षर-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

मूर्तये ॥ २२ ॥ समस्तव्यस्तसंग्रस्तरश्मिजालोदरात्मने । नमस्तुभ्यं महामीनरूपिणे विश्वगर्भिणे ॥ २३ ॥ रेवारणिसमुद्भूतवह्निज्वालावभासिने । घनीभूतविकल्पात्मविश्वबन्धविभेदिने ॥ २४ ॥ भोगिनीस्यन्दनारूढिप्रौढिमालब्धगर्विणे । नमस्ते सर्वभक्ष्याय परमामृतलाभिने ॥ २५ ॥ णफकोटिसमावेशभरिताखिलसृष्टये । नमः शक्तिशरीराय कोटिद्वितयसङ्गिने ॥ २६ ॥ महामोहमलाक्रान्तजीववर्गप्रबोधिने । महेश्वराय जगतां नमः कारणबन्धवे ॥ २७ ॥ स्तेनोन्मूलनदक्षैकस्मृतये विश्वमूर्तये । नमस्तेऽस्तु महादेवनाम्ने परस्वधात्मने ॥ २८ ॥ रुग्द्राविणे महावीर्यरुरुवंशविनाशिने । रुद्राय द्रावितारोषबन्धनाय नमोनमः ॥ २९ ॥ द्रवत्पररसास्वादचर्वणोद्युक्तशक्तये । नमस्त्रिदशपूज्याय सर्वकारणहेतवे ॥ ३० ॥ रूपातीत नमस्तुभ्यं नमस्ते बहुरूपिणे । त्र्यम्बकाय त्रिधामान्तश्चारिणे च त्रिचक्षुषे ॥ ३१ ॥ पेशलोपायलभ्याय भ्रान्तिभाजां महात्मने ॥ ३२ ॥ दुर्लभाय मलाक्रान्तचेतसां तु नमोनमः ॥३२॥ भवप्रदाय दुष्टानां भवाय भवभेदिने । भव्यानां तन्मयानां तु सर्वदाय नमोनमः ॥ ३३ ॥ अणूनां भुक्तये घोरघोरसंसारदायिने । घोरातिघोरमूढानां तिरस्कर्त्रे नमोनमः ॥ ३४ ॥ इत्येवं स्तोत्रराजेशं महाभैरवभाषितम् । योगिनीनां परं सारं न दद्याद्यस्य कस्यचित् ॥ अदीक्षिते शठे क्रूरे निःसत्ये शुचिवर्जिते । नास्तिके च खले मूर्खे प्रमत्ते विप्लुतेऽलसे ॥ गुरुशास्त्रसदाचारदूषके कलहप्रिये । निन्दके चुम्भके क्षुद्रेऽसमयज्ञे च दाम्भिके ॥ दाक्षिण्यरहिते पापे धर्महीने च गर्विते । भक्ति-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

युक्ते प्रदातव्यं न देयं परदीक्षिते ॥ पशूनां सन्निधौ देवि नोच्चार्यं सर्वथा क्वचित् । अस्यैव स्मृतमात्रस्य विघ्ना नश्यन्ति सर्वशः ॥ गुह्यका यातुधानाश्च वेताला राक्षसादयः । डाकिन्यश्च पिशाचाश्च क्रूरसत्वाश्च पूतनाः ॥ नश्यन्ति सर्वे पठितस्तोत्रस्यास्य प्रभावतः। खेचरी भूचरी चैव डाकिनी शाकिनी तथा ॥ ये चान्ये बहुधा भूता दुष्टसत्त्वा भयानकाः । व्याधिदौर्भिक्षदौर्भाग्यमारीमोहविषादयः ॥ गजव्याघ्रादयो भीताः पलायन्ते दिशो दश । सर्वे दुष्टाः प्रणश्यन्ति चेत्याज्ञा पारमेश्वरी ॥ इति श्रीललितस्वच्छन्दे बहुरूपगर्भस्तोत्रराजः सम्पूर्णः ॥

---

## अथ साम्बसदाशिवकवचस्तोत्रम् ॥

अस्य श्रीसाम्बसदाशिवकवचराजस्य, ऋषभयोगीश्वर ऋषिः, अनुष्टुप्च्छन्दः श्रीसाम्बसदाशिवो देवता, ॐ बीजं, नमः शक्तिः, शिवायेति कीलकं, श्रीसाम्बसदाशिवप्रीत्यर्थे पाठे विनियोगः ॥ ॐ अङ्गुष्ठाभ्यां नमः, न तर्जनीभ्यां नमः, मः मध्यमाभ्यां नमः, शि अनामिकाभ्यां नमः, वा कनिष्ठकाभ्यां नमः, य करतलकरपृष्ठाभ्यां नमः ॥ ॐ हृदयाय नमः, न शिरसे स्वाहा, मः शिखायै वषट्, शि कवचाय हुं, वा नेत्राभ्यां वौषट्, य अस्त्राय फट् । प्राणायामः ॥ ध्यानं । ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् । पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिने-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

त्रम् ॥ "तत्पुरुषाय विद्महे, महादेवाय धीमहि, तन्नो रुद्रः प्रचोदयात्" ॥ ३ ॥ ऋषभ उवाच ॥ नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरम् । वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥ १ ॥ शुचौ देशे समासीनो यथावत्कल्पितासनः । जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम् ॥ २ ॥ हृत्पुण्डरीकान्तरसन्निविष्टं स्वतेजसा व्याप्तनभोवकाशम् । अतीन्द्रियं सूक्ष्ममनन्तमाद्यं ध्यायेत्परानन्दमयं महेशम् ॥ ३ ॥ ध्यानावधूताखिलकर्मबन्धश्चिरं चिदानन्दनिमग्नचेताः । षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥ ४ ॥ मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे । यन्नाम दिव्यं वरमन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥ ५ ॥ सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मयानन्दघनश्चिदात्मा । अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥ ६ ॥ यो भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः । योऽपां स्वरूपेण नृणां करोति सञ्जीवनं सोऽवतु मां जलेभ्यः ॥ ७ ॥ कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः । स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेर्निखिलाच्च तापात् ॥ ८ ॥ यो वायुरूपेण चलत्वमाप प्राणादिभिः सोऽवतु मां दृढाय । सव्योमरूपो निखिलावकाशो ह्याकाशरूपेण करोतु रक्षाम् ॥ ९ ॥ यः कालकृत्कालभयाच्च सोऽव्यात् दिवाकरत्वेन जगत्त्रये माम् । निशाकरत्वेन वनस्पतीशो यो वा मनः सोऽवतु निश्चलाय ॥ १० ॥ यो वेद नाम व्यवहारभोक्ता जीवस्वरूपेण हृषीकसाक्षी । स पातु सत्कर्मफलप्रदो मां मखाग्र्यविध्वं-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

सकयज्वमूर्तिः ॥ ११ ॥ प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः । चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्रम् ॥ १२ ॥ कुठारवेदाङ्कुशपाशशूलकपालढक्काक्षगुणान्ददानः । चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादऽघोरो दिशि दक्षिणस्याम् ॥ १३ ॥ कुन्देन्दुशङ्खस्फटिकावभासो वेदाक्षमालावरदाभयाङ्कः । त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोऽवतु मां प्रतीच्याम् ॥ १४ ॥ वराक्षमालाभयढक्कहस्तः सरोजकिञ्जल्कसमानवर्णः । त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥ १५ ॥ वेदाभयेष्टाङ्कुशपाशटङ्ककपालढक्काक्षत्रिशूलपाणिः । सितद्युतिः पञ्चमुखोऽवतान्मामीशान ऊर्ध्वं परमप्रकाशः ॥ १६ ॥ मूर्धानमव्यान्मम चन्द्रमौलिर्भालं ममाव्यादऽथ भालनेत्रः । नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥ १७ ॥ पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली । वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥ १८ ॥ कण्ठं गिरीशोऽवतु नीलकण्ठः स्कन्दौ वृषस्कन्दगतः सदाऽव्यात् । स्तनद्वयं पातु सदा महेशः पार्श्वद्वयं मे भगवान्गिरीशः ॥ १९ ॥ भुजद्वयं पातु भुजङ्गधारी पाणिद्वयं पातु पिनाकपाणिः । दोर्मूलमव्यान्मम धर्मबाहुर्वक्षःस्थलं दक्षमखान्तकोऽव्यात् ॥ २० ॥ ममोदरं पातु गिरीन्द्रधन्वा मध्यं ममाव्यान्मदनान्तकारी । हेरम्बतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ॥ २१ ॥ गुह्यं हरो रक्षतु वासुकीशः पृष्ठं ममाव्याद्गगनापगेशः । ऊरुद्वयं पातु कुबेरमित्रो जानुद्वये मे जगदीश्वरोऽव्यात् ॥ २२ ॥ जङ्घाद्वयं

CC-0. Narinder Safaya Collection. Digitized by eGangotri

पुङ्गवकेतुरव्यात्पादौ ममाव्यात्सुरवन्द्यपादः । पायान्ममान्तः-करणं परात्मा सर्वाङ्गमव्यान्मम सर्वगुप्तः ॥ २३ ॥ महेश्वरः पातु दिनाद्ययामे मां मध्ययामेऽवतु वामदेवः । त्रिलोचनः पातु तृतीययामे वृषध्वजः पातु दिनान्तयामे ॥ २४ ॥ पाया-न्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु मां निशीथे । गौरी-पतिः पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम् ॥ २५ ॥ अन्तःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु बहिःस्थितं माम् । तदन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां सम-न्तात् ॥ २६ ॥ तिष्ठन्तमव्याद्भुवनैकनाथः पायाद्व्रजन्तं प्रमथा-धिनाथः । वेदान्तवेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवः शयानम् ॥ २७ ॥ मार्गेषु मां रक्षतु नीलकण्ठः शैलादिदुर्गेषु पुरत्रयारिः । अरण्यवासादिमहाप्रवासे पायान्मृगव्याधउदार-शक्तिः ॥ २८ ॥ कल्पान्तकालोग्रपटुप्रकोपस्फुटाट्टहासोच्चलि-ताण्डकोशः । घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः ॥ २९ ॥ पत्त्यश्वमातङ्गरथावरूथवत्सहस्रलक्षायुतकोटिभीषणम् । अक्षौहिणीनां शतमाततायिनां छिन्द्यान्मृडो घोरकुठारधारया ॥ ३० ॥ निहन्तु दस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरान्त-कस्य । शार्दूलसिंहर्क्षवृकादिहिंस्रान्सन्त्रासयत्वीशधनुः पिनाकः ॥ ३१ ॥ दुःस्वप्नदुःशकुनदुर्गमदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसह-दुर्यशांसि । उत्पातशापविषभीतिमसद्ग्रहार्तिं व्याधींश्च नाशयतु मे जगतामधीशः ॥ ३२ ॥ ॐ नमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सर्वयन्त्राधिष्ठिताय सर्वतन्त्रस्वरूपाय सर्वमन्त्र-स्वरूपाय सर्वतत्त्वविदुराय ब्रह्मरुद्रावतारिणे नीलकण्ठाय पार्व-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

तीमनोहरप्रियाय सोमसूर्याग्निलोचनाय भस्मोद्धूलितविग्रहाय महामुकुटधारिणे माणिक्यभूषणाय सृष्टिस्थितिप्रलयकालाग्नि-रुद्रावताराय दक्षाध्वरध्वंसकाय महाकालभेदनाय मूलाधारैक-निलयाय तत्त्वातीताय गङ्गाधराय सर्वदेवाधिदेवाय षडाश्रयाय वेदान्तसाराय त्रिवर्गसाधनाय अनेककोटिब्रह्माण्डजनकाय अन-न्तवासुकितक्षककार्कोटकशङ्खपालकुलिकपद्ममहापद्मेत्यष्टनागकु-लभूषणाय प्रणवस्वरूपाय चिदाकाशाय आकाशदिक्स्वरूपाय सकलग्रहनक्षत्रमालिने सकलाय सकलकलङ्करहिताय सकललो-कैककर्त्रे सकललोकैकभर्त्रे सकललोकैकगुरवे सकललोकैकसा-क्षिणे सकललोकैकवरप्रदाय सकलनिगमगुह्याय सकलवेदान्त-पारगाय सकलदुरितार्तिभञ्जनाय सकलजगदभयङ्कराय सकल-लोकैकशङ्कराय शशाङ्कशेखराय शाश्वतनिजावासाय निर्गुणाय नीरूपाय निराभासाय निरामयाय निरातंकाय निष्प्रपञ्चाय निष्कलङ्काय निर्द्वन्द्वाय निःसङ्गाय निर्मलाय निर्गमाय निरु-पमविभवाय निर्भयाय निर्लोभाय निष्क्रोधाय निश्चिन्ताय निरहंकाराय निराकुलाय निराधाराय नित्यशुद्धबुद्धपरिपूर्ण-सच्चिदानन्दाय परमशान्तप्रकाशतेजोरूपाय तेजोमयाय जय जय रुद्र महारुद्रवीरभद्रावतार महाभैरव कालभैरव कल्पान्त-भैरव कपालमालाधर खट्वाङ्गखड्गचर्मपाशांकुशडमरुकशूल-चापबाणगदाशक्तिभिण्डिपालतोमरमुसलमुद्गरप्रासपट्टिशपाश-परशुपरिघभुसण्डीशतघ्नीचक्राद्यायुधभीषणकर सहस्रमुख दंष्ट्रा-करालविकटाट्टहासविस्फारितब्रह्माण्डमण्डल नागेन्द्रकुण्डल नागेन्द्रहारवलय नागेन्द्रचर्माम्बरधर मृत्युञ्जय त्र्यंबकत्रिपुरा-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

न्तक विरूपाक्ष विश्वेश्वर विश्वरूप वृषभवाहन विषभीषण विश्वतोमुख सर्वतो मां रक्ष रक्ष ज्वल ज्वल प्रज्वल २ महामृत्युभयं नाशय २ विषसर्पभयं शमय २ रोगभयमुत्सादय २ चोरभयं नाशय २ चोरान्मारय २ ममशत्रून् उच्चाटय २ त्रिशूलेन विदारय २ कुठारेण भिन्धि २ खड्गेन छिन्धि २ खट्वाङ्गेन विपोथय २ मुसुलेन निष्पेषय २ बाणैः सन्ताडय २ तृतीयनेत्रेण सन्तापय २ रक्षांसि भीषय २ भूतान् विद्रावय २ कूष्माण्डवेतालभूतमारीब्रह्मराक्षसगणान् सन्त्रासय २ ममाऽभयं कुरु २ वित्रस्तं मामाश्वासय २ नरकमहाभयान्मामुद्धर २ संजीवय २ क्षुत्तृड्भ्यां मामाप्यायय २ दुःखातुरं मामानन्दय २ शिवकवचेन मामाच्छादय २ त्र्यम्बक सदाशिव नमस्ते नमस्ते नमस्ते ॥ ऋषभ उवाच । इतीदं कवचं शैवं वरदं व्याहृतं मया । सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम् ॥१॥ यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् । न तस्य जायते क्वापि भयं शम्भोरनुग्रहात् ॥ २ ॥ क्षीणायुः प्राप्तमृत्युर्वा महारोगहतोऽपि वा । सद्यः सुखमवाप्नोति दीर्घमायुश्च विन्दति ॥ ३ ॥ सर्वदारिद्र्यशमनं सर्वमङ्गल्यवर्धनम् । यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥ ४ ॥ महापातकसंघातैर्मुच्यते चोपपातकैः । देहान्ते मुक्तिमाप्नोति शिववर्मानुभावतः ॥ ५ ॥ त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम् । धारयस्व मया धत्तं सद्यः श्रेयो ह्यऽवाप्स्यसि ॥ ६ ॥ इति श्रीस्कन्दपुराणे शिवकवचं सम्पूर्णम् ॥

CC-0. Narinder Safaya Collection. Digitized by eGangotri

## अथाऽनुलेपार्थं शिवमहिमस्तोत्रम् ॥

क्षेपकः ॥ "आधीनामगदं दिव्यं व्याधीनां मूलकृन्तनम् । उपद्रवानां दलनं महादेवमुपास्महे ॥ १ ॥ अहं पापी पापक्षपणनिपुणः शङ्कर! भवानऽहं भीतो भीताऽभयवितरणे ते व्यसनिता । अहं दीनो दीनोद्धरणविधिसज्जस्त्वमितरन्न जानेऽहं वक्तुं कुरु सकलशोच्ये मयि कृपाम् ॥ २ ॥ जनास्त्वत्पादाब्जश्रवणमननध्याननिपुणाः स्वयं ते निस्तीर्णा न खलु करुणा तेषु करणा । भवे लीने दीने मयि मननहीने न करुणा कथं नाथ ख्यातस्त्वमसि करुणासागर इति ॥ ३ ॥"

ॐ महिम्नः पारं ते परमऽविदुषो यद्यऽसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः । अथाऽवाच्यः सर्वः स्वमतिपरिणामावधि गृणन्ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥ १ ॥ अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि । स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥ मधुस्फीता वाचः परमममृतं निर्मितवतस्तव ब्रह्मन् किं वागऽपि सुरगुरोर्विस्मयपदम् । मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन्पुरमथन! बुद्धिर्व्यवसिता ॥ ३ ॥ तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु । अभव्यानामस्मिन्वरद! रमणीयामरमणीं विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४ ॥ किमीहः किंकायः

CC-0. Narinder Safaya Collection. Digitized by eGangotri

स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादानमिति च । अतर्क्यैश्वर्ये त्वय्यऽनवसरदुःस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगताम् ॥ ५ ॥ अजन्मानो लोकाः किमऽवयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति । अनीशो वा कुर्याद्भुवनजनने कः परिकरो यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥ ६ ॥ त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमधः पथ्यमिति च । रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७ ॥ महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणम् । सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८ ॥ ध्रुवं कश्चित्सर्वं सकलमपरस्तु ध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये । समस्तेऽप्येतस्मिन्पुरमथन! तैर्विस्मित इव स्तवञ्जिह्रेमि त्वा न खलु ननु धृष्टा मुखरता ॥ ९ ॥ तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः परिच्छेत्तुं यातावनलमनलस्कन्दवपुषः । ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश! यत्स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥ १० ॥ अयत्नादासाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् । शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर! विस्फूर्जितमिदम् ॥ ११ ॥ अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेपि त्वदधिवसतौ विक्रमयतः । अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः ॥ १२ ॥ यदृद्धिं

CC-0. Narinder Safaya Collection. Digitized by eGangotri

सुत्राम्णो वरद! परमोच्चैरपि सतीमधश्चक्रे बाणः परिजन-
विधेयत्रिभुवनः । न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न
कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ १३ ॥ अकाण्ड-
ब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयन ! विषं
संहृतवतः । स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥ १४ ॥ असिद्धार्था
नैव क्वचिदपि सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो
यस्य विशिखाः । स पश्यन्नीश त्वामितरसुरसाधारणमभूत्स्मरः
स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः ॥ १५ ॥ मही पादा-
घाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्ण-
ग्रहगणम् । मुहुर्द्यौर्दौस्थ्यं यात्यऽनिभृतजटाताडिततटा जगद्र-
क्षायै त्वं नटसि ननु वामैव विभुता ॥ १६ ॥ वियद्व्यापी
तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघु दृष्टः
शिरसि ते । जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवो-
न्नेयं धृतमहिम! दिव्यं तव वपुः ॥ १७ ॥ रथः क्षोणी यन्ता
शतधृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर
इति । दिधक्षोस्ते कोयं त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीड-
न्त्यो न खलु परतन्त्राः प्रभुधियः ॥ १८ ॥ हरिस्ते साहस्रं
कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषस्त्रयाणां रक्षायै त्रिपुर-
हर जागर्ति जगताम् ॥ १९ ॥ क्रतौ सुप्ते जाग्रत्त्वमसि फल-
योगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते । अत-
स्त्वामुत्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ श्रद्धां बद्ध्वा दृढपरि

CC-0. Narinder Safaya Collection. Digitized by eGangotri

करः कर्मसु जनः ॥ २० ॥ क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद ! सदस्याः सुरगणाः । क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥ २१ ॥ प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा । धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ २२ ॥ अपूर्वं लावण्यं विवसनतनोस्ते विमृशतां मुनीनां दाराणां समजनि स कोपव्यतिकरः । यतो भग्ने गुह्ये सकृदऽपि सपर्यां विदधतां ध्रुवं मोक्षोऽश्लीलं किमपि पुरुषार्थप्रसवि ते ॥ २३ ॥ स्वलावण्याशंसा धृतधनुष्यमऽह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि । यदि स्त्रैणं देवी यमनिरत देहार्धघटनादवैति त्वामद्धावत वरद मुग्धा युवतयः ॥ २४ ॥ श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः । अमङ्गल्यं शीलं तव भवतु नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मङ्गलमसि ॥ २५ ॥ मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः । यदालोक्याह्लादं ह्रद इव निमज्ज्याऽमृतमये दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान्॥ २६ ॥ त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च । परिच्छिन्नामेवं त्वयि परिणतां बिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥ २७ ॥ त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति । तुरीयं ते धाम ध्वनिभिरनुरन्धानमणुभिः

CC-0. Narinder Safaya Collection. Digitized by eGangotri

समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥ २८ ॥ भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महांस्तथा भीमेशानाविति यदभिधानाष्टकमिदम् । अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते ॥ २९ ॥ वपुष्प्रादुर्भावादऽनुमितमिदं जन्मनि पुरा पुरारे! नैवाहं क्वचिदपि भवन्तं प्रणतवान् । नमन्मुक्तः सम्प्रत्यतनुरहमग्रेप्यऽनतिमान्महेश ! क्षन्तव्यं तदिदमपराधद्वयमपि ॥ ३० ॥ नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः । नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो नमः सर्वस्मै ते तदिदमति सर्वाय च नमः ॥ ३१ ॥ बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः प्रबलतमसे तत्संहारे हराय नमो नमः । जनसुखकृते सत्वोद्रिक्तौ मृडाय नमो नमः प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३२ ॥ कृशपरिणति चेतः क्लेशवश्यं क्वचेदं क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः । इति चकितमऽमन्दीकृत्य मां भक्तिराऽधाद्वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥ ३३ ॥ सुरभुजगनरेन्द्रैरर्चितस्येन्दुमौलेः प्रथितगुणगरिम्णो ज्ञानकारुण्यमूर्तेः । सकलगुणवरेण्यः पुष्पदन्ताऽभिधानो व्यदधदऽलघुवृत्तैः स्तोत्रमेतद्वरीयः ॥ ३४ ॥ असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी । लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश ! पारं न याति ॥ ३५ ॥ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति परमभक्त्या शुद्धचित्तः पुमान्यः । स भवति शिवलोके रुद्रतुल्यस्तथात्र प्रचुरतरधनायुः

CC-0. Narinder Safaya Collection. Digitized by eGangotri

पुत्रवान्कीर्तिमांश्च ॥ ३६ ॥ दीक्षा दानं तपस्तीर्थस्नानं योगादिकाः क्रियाः । महिम्नस्तव पाठस्य कलां नार्हन्ति षोडशीम् ॥ ॥ ३७ ॥ महेशान्नापरो देवो महिम्नो नापरा स्तुतिः । अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥ ३८ ॥ कुसुमदशननामा सर्वगन्धर्वराजः शशधरवरमौलेर्देवदेवस्य दासः । स गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥ ३९ ॥ सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः । व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥ ४० ॥ श्रीपुष्पदन्त मुखपङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरप्रियेण । कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः ॥ ४१ ॥ इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः । अर्पिता तेन मे देवः प्रीयतां च सदाशिवः ॥ ४२ ॥ क्षे० ॥ आ किं न रक्षसि नयत्ययमन्तको मां हेलावलेपसमयः किमयं महेश । मा नाम भूतकरुणया हृदयस्य पीडा व्रीडापि नास्ति शरणागतमुज्झतस्ते? । इति श्रीपुष्पदन्तविरचितं शिवमहिमस्तोत्रमनुलेपनार्थम् ॥

---

## शिवचामरार्थं जयस्तुत्यादि शिवस्तोत्रत्रयम्।

जय सर्वजनाधीश जय गौरीपते शिव । जय देव महादेव जयगङ्गाधरेश्वर । जय दग्धपुराध्यक्ष जय कालान्तकारक । जय कामविरामेश जय भक्तानुकम्पक ॥ जय त्रैलोक्यसंरक्षिन् जय निर्गुण सद्गुण । जयानन्तगुणारम्भ जय घोर महेश्वर ॥

CC-0. Narinder Safaya Collection. Digitized by eGangotri

जय चन्द्रकलाक्रान्त जय नागेन्द्रभूषण । जय पुङ्गवसत्केतो जय त्र्यक्ष महेश्वर ॥ जयान्तकरिपो शम्भो जय ब्रह्मादिकारण । जय पञ्चकलातीत जय शूलिन्कपालभृत् ॥ जयोपेन्द्रेन्द्रचन्द्राद्य जय नन्द्यादिवन्दित । जयानेकगणाधीश जय स्वामिन् महेश्वर ॥ जय विश्वाद्य विश्वेश जय विश्वैककारण । जय विश्वसृजां मुख्य जय विश्वस्य सद्गुरो ॥ जय निरामय जय सुधामय जय धृतामृतदीधिते, जय हतान्तक जय कृतान्तक जय पुरान्तक सद्गते । जय परापर जय दयापर जय नतार्पितसद्गते जय जितस्मर जय महेश्वर जय जय त्रिजगत्पते ॥ इति जयस्तुतिः ॥ व्याप्तचराचरभावविशेषं चिन्मयमेकमनन्तमनादिम् । भैरवनाथमनाथशरण्यं त्वन्मयचित्ततया हृदि वन्दे ॥ १ ॥ त्वन्मयमेतदशेषमिदानीं भाति मम त्वदनुग्रहशक्त्या । त्वं च महेश सदैव ममात्मा स्वात्ममयं मम तेन समस्तम् ॥ २ ॥ स्वात्मनि विश्वगते त्वयि नाथे तेन न संसृतिभीतिकथास्ति । सत्स्वपि दुर्धरदुःखविमोहत्रासविधायिषु कर्मगणेषु ॥ ३ ॥ अन्तक मां प्रति मा दृशमेनां क्रोधकरालतमां विदधीहि । शङ्करसेवनचिन्तनधीरो भीषणभैरवशक्तिमयोस्मि ॥ ४ ॥ इत्थमुपोढभवन्मयसंविद्दीधितिधारितभूरितमिस्रः । मृत्युयमान्तककर्मपिशाचैर्नाथ नमोस्तु न जातु बिभेमि ॥ ५ ॥ प्रोदितसत्यविबोधमरीचिप्रोक्षितविश्वपदार्थसतत्त्वः । भावपरामृतनिर्भरपूर्णे त्वय्यहमात्मनि निर्वृतिमेमि ॥ ६ ॥ मानसगोचरमेति यदैव क्लेशदशाऽतनुतापविधात्री । नाथ तदैव मम त्वदभेदस्तोत्रपरामृतवृष्टिरुदेति ॥ ७ ॥ शङ्कर



CC-0. Narinder Safaya Collection. Digitized by eGangotri

सत्यमिदं व्रतदानस्नानतपो भवतापविनाशि । तावकशास्त्रपरामृतचिन्ता सिन्धति चेतसि निर्वृतिधाराः ॥ ८ ॥ नृत्यति गायति हृष्यति गाढं संविदियं मम भैरवनाथ । त्वां प्रियमाप्य सुदर्शनमेकं दुर्लभमन्यजनैः समयज्ञम् ॥ ९ ॥ वसुरसपौषे कृष्णदशम्यामभिनवगुप्तः स्तवमिममकरोत् । येन विभुर्भवमरुसन्तापं शमयति झटिति जनस्य दयालुः ॥ १० ॥ इत्यऽभिनवोक्तभैरवस्तुतिः ॥ अतिभीषणकटुभाषणयमकिंकरपटलीकृतताडनपरिपीडनमरणागमसमये । उमया सह मम चेतसि यमशासन निवसञ्छिव शंकर शिव शंकर हर मे हर दुरितम् ॥ १ ॥ अतिदुर्नयचटुलेन्द्रियरिपुसञ्चयदलिते पविकर्कशकटुजल्पितखलगर्हणचलिते । शिवया सह मम चेतसि शशिशेखर निवसञ्छिव० ॥ २ ॥ भवभञ्जन सुररञ्जन खलवञ्चन पुरहन् दनुजान्तक मदनान्तक रविजान्तक भगवन् । गिरिजावर करुणाकर परमेश्वर भयहञ्छिव श० ॥ ३ ॥ शक्रशासन कृतशासन चतुराश्रमविषये कलिविग्रह भवदुर्ग्रह रिपुदुर्बलसमये । द्विजक्षत्रियवनिताशिशुदरकम्पितहृदये शिव० ॥ ४ ॥ भवसंभवविविधामयपरिपीडितवपुषं दयितात्मजममताभरकलुषीकृतहृदयम् । कुरु मां निजचरणार्चननिरतं भव सततं शिव० ॥ ५ ॥ इति चामरार्थ जयस्तुत्यादि शिवस्तोत्रत्रयम् ॥ अथ पञ्चाक्षरषडक्षरशिवस्तुतिः ॥ नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय । देवाधिदेवाय दिगम्बराय तस्मै नकाराय नमःशिवाय ॥ १ ॥ मातङ्गचर्माम्बरभूषणाय समस्तगीर्वाणगणार्चिताय । त्रैलोक्य-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

नाथाय पुरान्तकाय तस्मै मकारा० ॥ २ ॥ शिवामुखाम्भोज-विकासनाय दक्षस्य यज्ञस्य विनाशकाय । चन्द्रार्कवैश्वानरलोचनाय तस्मै शिकारा० ॥ ३ ॥ वसिष्ठकुम्भोद्भवगौतमादिमुनीन्द्रवन्द्याय गिरीश्वराय । श्रीनीलकण्ठाय वृषध्वजाय तस्मै वकारा० ॥ ४ ॥ यज्ञस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय । नित्याय शुद्धाय निरञ्जनाय तस्मै यकाराय० ॥ ५ ॥ इति ॥ ॐकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः । कामदं मोक्षदं चैव ॐकारं तं नमाम्यहम् ॥ १ ॥ न जातो न मृतो यश्च क्षयो यस्य न विद्यते । नमन्ति दैवताः सर्वे नकारं तं० ॥ २ ॥ महादेवं महावक्त्रं महाध्यानपरायणम् । महापापहरं देवं मकारं तं० ॥ ३ ॥ शिवात्परतरो नास्ति शिवशास्त्रेषु निश्चयः । शमन्ति सर्वपापानि शिकारं० ॥ ४ ॥ वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम् । वामे शक्तिधरं देवं वकारं तं० ॥ ५ ॥ यत्र तत्र स्थितो देवः सर्वव्यापी महेश्वरः । यो गुरुः सर्वदेवानां यकारं तं० ॥ ६ ॥ ॐकारं कर्मचक्रेषु नकारं नाभिमण्डले । मकारं हृदये देशे शकारं कण्ठभूषणम् । वकारं वक्त्रमध्ये तु यकारं ब्रह्मरन्ध्रगम् ॥ एवं षडक्षरस्तोत्रं यः पठेच्छिवसन्निधौ । शिवलोकमवाप्नोति शिवेन सह मोदते ॥ इति पञ्चाक्षरषडक्षरशिवस्तुतिः ॥

CC-0. Narinder Safaya Collection. Digitized by eGangotri

# अथ शिवनिर्वाणस्तुतिः ॥ क्षमापनस्तुतिश्च ॥

जयत्यऽनन्यसामान्यप्रकृष्टगुणवैभवः । संसारनाटकारम्भनिर्वाहनकविः शिवः । ॐनमः शिवाय भूतभव्यभाविभावभाविने । ॐनमःशिवाय मातृमानमेयकल्पनाजुषे । ॐनमः० भीमकान्तशान्तशक्तिशालिने । ॐ०शाश्वताय शङ्कराय शम्भवे । ॐ० निर्निकेतनिःस्वभावमूर्त्तये । ॐ०निर्विकल्पनिष्प्रपञ्चसंविदे । ॐ०निर्विवादनिष्प्रमाणसिद्धये । ॐ० निर्मलाय निष्कलाय वेधसे । ॐ०पार्थिवाय गन्धमात्रसंविदे । ॐ०षड्साद्यसाम्यरस्यतृप्तये ॥ १० ॥ ॐ०तैजसाय रूपितानिरूपिणे । ॐ०पावनाय सर्वभावसंस्पृशे । ॐ०नाभसाय शब्दमात्रराविणे । ॐ०निर्गलन्मलव्यपायि पायवे । ॐ०विश्वसृष्टिसौष्ठवैकमेधसे । ॐ०सर्वतः प्रसारिपादसम्पदे । ॐ०विश्वभोग्यभोगयोग्यपाणये । ॐ०वाचकप्रपञ्चवाच्यवाचिने । ॐ० नस्यगन्धसर्वगन्धबन्धवे । ॐ०पुद्गलालिलोलकाग्रशालिने ॥ २० ॥ ॐ०चाक्षुषाय विश्वरूपसन्दृशे ॐ०तद्गुणत्रयविभागभूतये । ॐ०पौरुषाय भोक्तृदाय मानिने । ॐ०सर्वतो नियन्तृतानियामिने । ॐ०कामभेदकल्पनोपकल्पिने । ॐ०किञ्चिदेव वत्सताकरासृजे । ॐ०किञ्चिदेव वेत्तृतोपपादिने । ॐ०सर्वभोग्यवर्धनोपरागिणे । ॐ०शुद्धविद्यतत्त्वमन्त्ररूपिणे । ॐ०व्यक्तयाविकस्वरेशात्मने ॥३०॥ ॐ०सर्ववित्प्रभो सदाशिवाय ते । ॐ०वाच्यवाचकादिपङ्क्तिमित्तये । ॐ०वर्णमंत्रसत्पदोपपादिने । ॐ०पञ्चधा कलाप्र-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

पञ्चपञ्चिने । ॐ०सौरजैनबौद्धशुद्धभागिने । ॐ०भक्तिमात्रल-
भ्यदर्शनाय ते । ॐ०सर्वतो गरीयसां गरीयसे । ॐ०सर्वतो
महीयसां महीयसे । ॐ०सर्वतः स्थवीयसां स्थवीयसे । ॐ०-
तुभ्यमस्त्वणीयसामणीयसे ॥ ४० ॥ ॐ०मन्दराद्रिकन्दराधि-
शायिने । ॐ०जाह्नवीजलोज्ज्वलाभजूटिने । ॐ०भालचन्द्रच-
न्द्रिकाकिरीटिने । ॐ०सोमसूर्यवह्निमात्रनेत्र ते । ॐ०कालकू-
टकण्ठपीठसुश्रिये । ॐ०धर्मरूपपुङ्गवध्वजाय ते । ॐ०भस्मधू-
लिशालिने त्रिशूलिने । ॐ०सर्वलोकपालिने कपालिने । ॐ०-
सर्वदैत्यमर्दिने कपर्दिने । ॐ०नित्यनग्ननाकिने पिनाकिने
॥ ५० ॥ ॐ०नागराजहारिणे विहारिणे । ॐ०शैलजाविलासिने
सुखासिने । ॐ०मन्मथप्रमाथिने पुरप्लुषे । ॐ०कालदेहदाहयु-
क्तिकारिणे । ॐ०नागकृत्तिवाससेऽप्यऽवाससे । ॐ०भीषणश्म-
शानभूमिवासिने । ॐ०पीठशक्तिपीठकोपपादिने । ॐ०सिद्ध-
मन्त्रयोगिने वियोगिने । ॐ०सर्वदक्षक्रतुर्नयादिकारिणे । ॐ०-
सर्वतीर्थतीर्थताविधायिने ॥ ६० ॥ ॐ०साङ्गवेदतद्विचारचा-
रवे । ॐ०षट्पदार्थषोडशार्थवादिने । ॐ०सांख्ययोगपाञ्चरा-
त्रपश्चिने । ॐ०धातृविष्णुशर्वकादिरूपिणे । ॐ० धातृविष्णु
प्रमुखात्मरूपिणे । ॐ०भोग्यदाय भोग्यभोगरूपिणे । ॐ०पा-
रगाय पारणाय मन्त्रिणे । ॐ०पारमार्थपार्थिवस्वरूपिणे । ॐ०-
सर्वमण्डलाधिपत्यशालिने । ॐ०सर्वशक्तिवासनानिवासिने
॥ ७० ॥ ॐ०सर्वतन्त्रवासनारसात्मने । ॐ०सर्वमन्त्रदेवतानि-
योगिने । ॐ०स्वस्थिताय नित्यकर्ममालिने । ॐ०कालकल्प-
कल्पिने सुतल्पिने । ॐ०भक्तकाय सौख्यदाय शम्भवे । ॐ०-
भूर्भुवःस्वरात्मलक्ष्यलक्षिणे । ॐ०शून्यभावशान्तरूपधारिणे ।

CC-0. Narinder Safaya Collection. Digitized by eGangotri

ॐ०सर्वभावशुद्धबुद्धिहेतवे । ॐ०सर्वसिद्धिदायिने सुमायिने । ॐ०भक्तिमात्रसंस्तुताय शूलिने ॥ ८० ॥ ॐनमः शिवाय भास्वते । ॐ०भर्ग ते । ॐ०शर्व ते । ॐ०गर्व ते । ॐ०खर्व ते । ॐ०पर्व ते । ॐ०रुद्र ते । ॐ०भीम ते । ॐ० विष्णवे । ॐ०जिष्णवे । ९० । ॐ०धन्विने । ॐ०खड्गिणे ॐ०चर्मिणे । ॐ०वर्मिणे । ॐ०कर्मिणे । ॐ०धर्मिणे । ॐ०भामिने । ॐ०कामिने । ॐ०योगिने । ॐ०भोगिने । ॐ०तिष्ठते । ॐगच्छते । ॐ०हेतवे । ॐ०सेतवे । ॐ०सर्वतः । ॐ०सर्वशः । ॐ०सर्वदा । ॐ०सर्वथः १०८ ॥ भव शर्व रुद्रहर शंकर भूतपते गिरिश गिरीश भर्ग शशिशेखर नीलगल। त्रिनयन वामदेव गिरिजाधव माररिपो जयजय देवदेव भगवन्भवतेऽस्तु नमः ॥ एतामष्टोत्तरशतनमस्कारसंस्कारपूतां भूतार्थव्याहृतिनुतिमुदाहृत्य मृत्युञ्जयस्य । कश्चिद्विद्वान्यदिह कुशलं सञ्चिनोति स किञ्चित्तेनान्येषां भवति पठतामीप्सितार्थस्य सिद्धिः । इति व्यासोक्तनिर्वाणस्तुतिः ॥ अथ शिवापराधक्षमापनस्तुतिः ॥ ॐआदौ कर्मप्रसङ्गात्कलयति कलुषे मातृकुक्षौ स्थितं मां विण्मूत्रामेध्यमध्ये क्वथयति नितरां जाठरो जातवेदाः । यद्यद्वै तत्र दुःखं व्यथयति विविधं शक्यते केन वक्तुं क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥ १ ॥ बाल्ये दुःखातिरेकान्मललुलितवपुः स्तन्यपाने पिपासी नो शक्यश्चेन्द्रियेभ्यो भवगुणजनितैर्जन्तुभिः संप्रदष्टः । नानारोगादिदुःखाद्रुदनपरवशः शङ्करं न स्मरामि क्षन्तव्यो मेऽपराधः० ॥२॥ प्रौढोऽहं यौवनस्थो विषयविषधरैः

CC-0. Narinder Safaya Collection. Digitized by eGangotri

पञ्चभिर्मर्मसन्धौ दष्टो नष्टो विवेकात्सुतधनयुवतिस्वादुसौख्ये निषण्णः । शैवीचिन्ताविहीनः परतपनरतो मानगर्वाधिरूढः क्षन्तव्यो मे० ॥ ३ ॥ वार्धक्ये चेन्द्रियाणां विनतिगतमतिश्चाधिदैवाधिभूतैर्दुःखै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढिहीनोऽतिदीनः । मिथ्यामोहाभिलाषैर्भ्रमन्नऽलिगणवत् धूर्जटेर्ध्यानभ्रष्टः क्षन्तव्यो० ॥ ४ ॥ स्नात्वा प्रत्यूषकाले स्नपनविधिकृते नाहृतं गाङ्गतोयं पूजार्थं वा कदाचिद्बहुतरगहनात्खण्डबिल्वीदलानि । नानीता पद्ममाला सरसि विकसिता गन्धपुष्पैस्त्वदर्थं क्षन्तव्यो० ॥ ५ ॥ स्थित्वा पद्मासनेहं प्रणवयुतमरुत्कुण्डलीसूक्ष्ममार्गाच्छान्ति नीते स्वस्वान्ते प्रकटितविभवं ज्योतिरूपं पराख्यम् । लिङ्गज्ञैर्ब्रह्मवाक्यैः सकलतनुगतं शङ्करं न स्मरामि क्षन्तव्यो० ॥ ६ ॥ ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो हव्यं ते लक्षसंख्यैर्हुतवहवदने नार्पितं बीजमन्त्रैः । नो तप्तं गाङ्गतीरे व्रतजपनियमैरुद्रजाप्यैर्न वेदैः क्षन्तव्यो० ॥ ७ ॥ दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितैः स्नापितं नैव लिङ्गं नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः । धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारैः क्षन्तव्यो० ॥ ८ ॥ नो शक्यं स्मार्तकर्म प्रतिपदगहनं प्रत्यभिज्ञातुमीषच्छ्रौतं वाक्यं कथं वा द्विजवरशमदं ब्रह्ममार्गप्रदीपम् । ज्ञेयो धर्मो विचारैः श्रवणमनु मया किं निदिध्यासितव्यं क्षन्तव्यो० ॥ ९ ॥ नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो नासाग्रे न्यस्तदृष्ट्या विदितभवगुणेनैव नेष्टः कदाचित् । उन्मत्तावस्थया त्वं विगतकलिमले स्वाशये नापि प्राप्तः क्षन्तव्यो० ॥ १० ॥ चन्द्रोद्भासितशेखरे स्मरहरे

CC-0. Narinder Safaya Collection. Digitized by eGangotri

गङ्गाधरे शंकरे सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे । दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे मोक्षार्थं कुरु चित्तवृत्तिमखिलामन्यैस्तु किं कर्मभिः ॥ ११ ॥ किंवाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं किंवा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम् । ज्ञात्वैतत् क्षणभङ्गुरं सपदि रे त्याज्यं मनो दूरतः स्वात्मस्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम् ॥१२॥ आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः । लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितं तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥ १३ ॥ आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः । सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥ १ ॥ ब्रूषे नोत्तरमङ्ग पश्यसि न मामेतादृशं दुःखितं विज्ञप्तिं बहुधा कृतां न शृणुषे नायासि मन्मानसे । संसारार्णवगर्तमध्यपतितं प्रायेण नालम्बसे वाक्चक्षुःश्रवणाङ्घ्रिपाणिरहितं त्वामाह सत्यं श्रुतिः ॥ २ ॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम् । विदितमविदितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शम्भो ॥१४॥ इति शंकराचार्यकृता शिवापराधक्षमापनस्तुतिः ॥ ॥

अथ रावणकृतदीनाक्रन्दाख्यशिवक्षमापणम् ॥ ॐगौरीश्वराय भुवनत्रयकारणाय भक्तप्रियाय भवभीतिभिदे भवाय । शर्वाय

CC-0. Narinder Safaya Collection. Digitized by eGangotri

दुःखशमनाय वृषध्वजाय रुद्राय कालदहनाय नमः शिवाय॥१॥ सर्वेश्वरत्वे सति भस्मशायिने ह्युमापतित्वे सति चोर्ध्वरेतसे । वित्तेशभृत्ये सति चर्मवाससे निवृत्तरागाय नमस्तपस्विने ॥२॥ ॐकारेण विहीनस्य नित्यमुद्विग्नचेतसः । तापत्रयाग्नितप्तस्य त्राणं कुरु महेश्वर ॥ ३ ॥ कायपोषणसक्तस्य रोगशोकाकुलस्य च । भवार्णवनिमग्नस्य त्राणं० ॥ ४ ॥ मदनोरगदष्टस्य क्रोधाग्निज्वलितस्य च । लोभमोहादिसक्तस्य त्राणं० ॥ ५ ॥ तृष्णाशृङ्खलया नाथ बद्धस्य भवपञ्जरे । कृपार्द्रदीनचित्तस्य त्राणं० ॥ ६ ॥ भटैर्नानाविधैर्घोरैर्यमस्याज्ञाविधायकैः । तां दिशं नीयमानस्य त्राणं० ॥ ७ ॥ दुष्टस्य नष्टचित्तस्य श्रेष्ठमार्गोज्झितस्य च । अनाथस्य जगन्नाथ त्राणं० ॥ ८ ॥ संसारपाशदृढबन्धनपीडितस्य मोहान्धकारविषमेषु निपातितस्य । कामार्दितस्य भयरागखलीकृतस्य दीनस्य मे कुरु दयां परलोकनाथ ॥ ९ ॥ दीनोस्मि मन्दधिषणोस्मि निराश्रयोस्मि दासोस्मि साधुजनतापरिवर्जितोस्मि । दुष्टोस्मि दुर्भगतमोस्मि गतत्रपोस्मि धर्मोज्झितोस्मि विकलोस्मि कलङ्कितोस्मि ॥ १० ॥ भीतोस्मि भङ्गुरतमोस्मि भयानकोस्मि शंकाशतव्यतिकराकुलचेतनोस्मि । रागादिदोषनिकरैर्मुखरीकृतोस्मि सत्यादिशौचनियमैः परिवर्जितोस्मि ॥ ११ ॥ जन्माटवीभ्रमणमारुतखेदितोस्मि नित्यामयोस्म्यऽशरणोस्म्यऽसमञ्जसोस्मि । आशानिरङ्कुशपिशाचिकयार्दितोस्मि हास्योस्मि हा पशुपते शरणागतोस्मि ॥ १२ ॥ हा हतोस्मि विनष्टोस्मि दष्टोस्मि चपलेन्द्रियैः । भवार्णवनिमग्नोस्मि किं त्रातुं मम नार्हसि ॥ १३ ॥ यदि नास्मि महापापी

CC-0. Narinder Safaya Collection. Digitized by eGangotri

यदि नास्मि भयातुरः। यदि नेन्द्रियसंसक्तस्तत्कोर्थः शरणे मम ॥ १४ ॥ आर्तो मत्सदृशो नान्यस्त्वत्तो नान्यः कृपापरः। तुल्य एवावयोर्योगः कथं नाथ न पाहि माम् ॥ १५ ॥ आकर्णयाऽशु कृपणस्य वचांसि सम्यक् लब्धोसि नाथ बहुभिर्ननु जन्मवृन्दैः। अद्य प्रभो यदि दयां कुरुषे न मे त्वं त्वत्तः परं कथय कं शरणं व्रजामि ॥ १६ ॥ द्वेष्योहं सर्वजन्तूनां बन्धूनां च विशेषतः। सुहृद्वर्गस्य सर्वस्य किमन्यत्कथयामि ते ॥१७॥ मातापितृविहीनस्य दुःखशोकातुरस्य च। आशापाशनिबद्धस्य रागद्वेषयुतस्य च ॥ १८ ॥ देवदेव जगन्नाथ शरणागतवत्सल। नान्यस्त्रातास्ति मे कश्चित्त्वदृते परमेश्वर ॥ १९ ॥ भीतोस्मि कालवशगोस्मि निराश्रयोस्मि खिन्नोस्मि दुःखजलधौ पतितोस्मि शम्भो। आर्त्तोस्मि मोहपटलेन समावृतोस्मि त्वां चन्द्रचूड शरणं समुपागतोस्मि ॥ २० ॥ आशिखान्तं निमग्नोस्मि दुस्तरे भवकर्दमे। प्रसीद कृपया शम्भो पादाग्रेणोद्धरस्व माम् ॥२१॥ श्रुत्वा मे भवभीतस्य भगवन्करुणा गिरः। तथा कुरु यथा भूयो न बाधन्ते भवापदः ॥ २२ ॥ समयशतविलुप्तं भक्तिहीनं कुचैलं मलिनवसनगात्रं निर्दयं पापशीलम्। रविजभ्रुकुटिभीतं रोगिणं प्राप्तदुःखं खलजनपरिभूतं रक्ष मां सर्वशक्ते ॥ २३ ॥ आपन्नोस्मि शरण्योसि सर्वावस्थासु सर्वदा। भगवंस्त्वां प्रपन्नोस्मि रक्ष मां शरणागतम् ॥ २४ ॥ जातस्य जायमानस्य गर्भस्थस्यापि देहिनः। माभूत्तत्र कुले जन्म यत्र शम्भुर्न दैवतम् ॥ २५ ॥ शङ्करस्य च ये भक्ताः शान्तास्तद्गतमानसाः। तेषां दासस्य दासोहं भूयां जन्मनि जन्मनि ॥ २६ ॥ नमस्कारा-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

दिसंयुक्तं शिवइत्यक्षरद्वयम् । जिह्वाग्रे वर्तते यस्य सफलं तस्य जीवितम् ॥ २७ ॥ यत्कृतं यत्करिष्यामि तत्सर्वं न मया कृतम् । त्वया कृतं तु फलभुक्त्वमेव परमेश्वर ॥ २८ ॥ यदक्षर-पदभ्रष्टं मात्राहीनं च यद्गतम् । मया दासेन विज्ञप्तं क्षम्यतां परमेश्वर ॥ २९ ॥ इति श्रीरावणकृता दीनाक्रन्दनस्तुतिः ॥

---

## अथ कैवल्योपनिषत् ॥

ॐअथाश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच । अधीहि भगवन् ! ब्रह्मविद्यां वरिष्ठां सदा सद्भिः सेव्यमानां निगूढाम् । ययाऽचिरात्सर्वपापं विपोह्य परात्परं पुरुषं याति विद्वान् ॥ तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यानयो-गादऽवेहि । न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व-मानशुः ॥ परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो वि-शन्ति । वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्ध-सत्त्वाः ॥ ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे॥ विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरःशरीरः । अत्याश्रमस्थः सकलेन्द्रियाणि निरुद्ध्य भक्त्या स्वगुरुं प्रणम्य ॥ हृत्पुण्डरीके विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् । अचिन्त्यमऽव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ॥ तथादिमध्यान्तविहीनमेकं विभुं चिदानन्दस्वरूपमद्भुतम् । उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ॥ ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥

CC-0. Narinder Safaya Collection. Digitized by eGangotri

स ब्रह्मा स शिवः सेन्द्रः सोक्षरः परमः स्वराट् । स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः ॥ स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् । ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । संपश्यन्ब्रह्म परमं याति नान्येन हेतुना ॥ आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ज्ञाननिर्मथनाभ्यासात्पाशं दहति पण्डितः ॥ स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् । स्त्रियान्नपानादिविचित्रभोगैः स एव जाग्रत्परितृप्तिमेति । स्वप्ने स जीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वभोगे । सुषुप्तिकाले सकले प्रलीने तमोभिभूतः सुखरूपमेति ॥ पुनश्च जन्मान्तरकर्मयोगात्स एव जीवः स्वपिति प्रबुद्धः । पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रम् ॥ आधारमानन्दमखण्डबोधं यस्मिँल्लयं याति पुरत्रयं च ॥ एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी ॥ यत्परं ब्रह्म सर्वात्मा विश्वस्याऽयतनं महत् । सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत् ॥ जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते । तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यो भवेत् । तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥ मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् । मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥ अणोरणीयानहमेव तद्वन्महानहं विश्वमिदं विचित्रम् । पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि ॥ अपाणिपादोऽहमचिन्त्यशक्तिः पश्याम्यऽचक्षुश्च

CC-0. Narinder Safaya Collection. Digitized by eGangotri

शृणोम्यऽकर्णः । अहं विजानामि विविक्तरूपो नचास्ति वेत्ता मम चित्सदाहम् ॥ वेदैरनेकैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ न पुण्यपापे मम नास्ति नाशो न जन्मदेहेन्द्रियबुद्धिरस्ति । न भूमिरापो मम वह्निरस्ति नचानिलो मेस्ति नचाम्बरं च ॥ एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् । समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ॥ यः शतरुद्रियमधीते सोग्निपूतो भवति । सुरापानात्पूतो भवति ब्रह्महत्यायाः पू० सुवर्णस्तेयात्पू० अकृत्यकृत्यात्पू०॥ तस्मादऽविमुक्तमात्माश्रितो भवत्यऽत्याश्रमी सर्वदा सकृद्वा जपेत् अनेन ज्ञानमाप्नोति संसारार्णवनाशनम् । तस्मादेवं विदित्वैनं कैवल्यं फलमश्नुते कैवल्यं फलमश्नुते ॥ इत्यथर्ववेदे कैवल्योपनिषत् ॥

---

## अथ शिवपूजा प्रारभ्यते ।

'अस्य श्री आसनशोधनमंत्रस्य मेरुपृष्ठऋषिः, सुतलं छन्दः, कूर्मो देवता आसनशोधने विनियोगः । ह्रीं पृथिव्यै आधारशक्त्यै समालभनं गन्धोनमः अर्घोनमः पुष्पं नमः । पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ "नमस्कार करना"॥ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि । सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदा रमन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥ गुरुर्ब्रह्मा गुरु-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

र्विष्णुर्गुरुः साक्षान्महेश्वरः । गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ॥ गुरवे नमः परमगुरवे नमः परमेष्ठिने गु० परमाचार्याय नमः आद्यसिद्धिभ्यो नमः॥ "न्यास करना" ॐअङ्गुष्ठाभ्यां नमः, न तर्जनीभ्यां नमः, मः मध्यमाभ्यां नमः, शि अनामिकाभ्यां नमः, वा कनिष्ठिकाभ्यां नमः, य करतलकरपृष्ठाभ्यां नमः ॥ "इति करन्यासः"॥ "अथ षडङ्गन्यासः" ॥ ॐ हृदयाय नमः, न शिरसे स्वाहा, मः शिखायै वौषट्, शि कवचाय हुं, वा नेत्रत्रयाय वौषट्, य अस्त्राय फट् ॥ "चारों तरफ तिलें फेंकना" ॥ अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ प्राणायामः॥ "मुख और पैरों को पानीसे छडकना" तीर्थे स्तेयं तीर्थमेव समानानां भवति मानः शंस्यो अररुषो धूर्तिः प्राणङ्‌ मर्त्यस्य रक्षाऽणो ब्रह्मणस्पते ॥ "पवित्र धारना" वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्ति ॥ "अपने आपको गन्धादिक लगाना"॥ स्वात्मने शिवस्वरूपाय समालभनं गन्धो नमः अर्घोनमः पुष्पं नमः ॥ "दीप को" स्वप्रकाशो महादीपः सर्वतस्तिमिरापहः । प्रसीद मम गोविन्द दीपोयं परिकल्पितः ॥ "धूप को" ॥ वनस्पतिरसो दिव्यो गन्धाढ्यो गन्धवत्तमः । आघ्रेयः सर्वदेवानां धूपोयं परिकल्पितः ॥ "सूरजको" ॥ नमो धर्मनिधानाय नमः स्वकृतसाक्षिणे । नमः प्रत्यक्षदेवाय भास्कराय नमोनमः ॥ "पानी छोडना"॥ यत्रास्ति माता न पिता न बन्धुर्भ्रातापि नो यत्र सुहृज्जनश्च । न ज्ञायते यत्र दिनं न रात्रिस्तत्रात्मदीपं शरणं प्र-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

पद्ये ॥ आत्मने शिवस्वरूपाय दीपधूपसङ्कल्पात्सिद्धिरस्तु दीपोनमः धूपोनमः ॥ ॐतत्सद्ब्रह्माऽद्यतावत्तिथावऽद्याऽमुकमासस्याऽमुकपक्षस्य तिथावऽमुकायामाऽत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं श्रीसदाशिवप्रीत्यर्थममुककामनासिद्ध्यर्थं भवायदेवाय, शर्वायदेवाय, रुद्रायदेवाय पशुपतयेदेवाय उग्रायदेवाय भीमायदेवाय महादेवाय ईशानायदेवाय पार्वतीसहिताय परमेश्वराय दीपोनमः धूपोनमः ॥ अपसव्येन । पित्रे पितामहाय प्रपितामहाय इत्यादिभ्यः दीपःस्वधा धूपःस्वधा ॥ सव्येन ॥ "विष्टरसहितपानी में तिन वार फूल और गन्ध छोडना" ॥ संवः सृजामि हृदयं संसृष्टं मनो अस्तुवः ॥ १ ॥ संसृष्टास्तन्वः सन्तुवः संसृष्टः प्राणो अस्तुवः ॥ २ ॥ संप्यावः प्रियास्तन्वः संप्रिया हृदयानि वः । आत्मा वो अस्तु संप्रियः संप्रियास्तन्वो मम ॥ ३ ॥ "वह पानी देव पर छोडना" ॥ अश्विनोः प्राणस्तौ ते प्राणन्दत्तां तेन जीव मित्रावरुणयोः प्राणस्तौ ते प्राणं दत्तां तेन जीव बृहस्पतेः प्राणः स ते प्राणं दत्तात्तेन जीव ॥ "देव को न्यास करना"॥ ॐ अङ्गुष्ठाभ्यां नमः इत्यादि॥"पृच्छा पडना"तन्महेशाय विद्महे वागिवशुद्धाय धीमहि तन्नः शिवः प्रचोदयात् ॥ ३ ॥ तत्सद्ब्रह्माऽद्यातावत्० । भवस्यदेवस्य शर्वस्यदेवस्य रुद्रस्य देवस्य पशुपतेर्देवस्य उग्रस्य देवस्य भीमस्य देवस्य महादेवस्य ईशानस्य देवस्य पार्वतीसहितस्य परमेश्वरस्य अर्चामहं करिष्ये ॐ कुरुष्व ॥ यवान्विकीर्य ॥ "आसन देना"॥ विश्वेश्वर महादेव राजराजेश्वरेश्वर । आसनं दिव्यमीशान दास्येहं परमेश्वर ॥ भवस्यदेवस्य० इदमासनं नमः ॥

CC-0. Narinder Safaya Collection. Digitized by eGangotri

"आवाहन करना"॥ भवायदेवाय० युष्मान्वः पूजयामि ॐपूजय। भवंदेवं शर्वदेवं रुद्रंदेवं पशुपतिंदेवं उग्रंदेवं भीमंदेवं महादेवं ईशानंदेवं पार्वतीसहितंपरमेश्वरं आवाहयिष्यामि ॐमावाहय॥ आयाहि भगवञ्छम्भो सर्वेश गिरिजापते। प्रसन्नो भव देवेश नमस्तुभ्यं हि शंकर॥ लिङ्गेत्र भक्तदयया क्षणमात्रमेकं स्थानं विधाय भव मद्विहितां पुरारे। सर्वेश विश्वमय हृत्कमलाधिरूढः पूजां गृहाण भगवन्भत्र मेद्य तुष्टः॥ भूमेर्जलात्तु पवनादनलाद्धिमांशोरुष्णांशुतोहृदयतो गगनात्समेत्य। लिङ्गेत्र सन्मणिमये मदनुग्रहार्थं भक्त्यैकलभ्य भगवन्कुरु सन्निधानम्॥ भगवन्पार्वतीनाथ भक्तानुग्रहकारक। असद्दयानुरोधेन सन्निधानं कुरु प्रभो॥ ३॥ इत्याहूय तु गायत्रीं त्रिः समुच्चार्य तत्त्ववित्। मनसा चिन्तितैर्द्रव्यैर्देवमात्मनि पूजयेत्॥ तेजोरूपं ततः क्षिप्त्वा प्रतिमायां पुनर्यजेत्॥ प्राणायामः॥ पाद्यार्थे उदकं नमः॥ "पानी हाथसे पात्र में वापस छोडना"॥ शन्नोदेवीरभिष्टय आपो भवन्तु पीतये, शंय्योरभिस्रवन्तु नः॥ "यह द्रव्य उसमें छोडना" लाजाश्च कुङ्कुमं चैव सर्वौषधिसमन्वितम्। दर्भाङ्कुरं जलं चैव पश्चाङ्गं पाद्यलक्षणम्॥ भगवन्तः पाद्यं॥ २॥ महादेव महेशान महानन्द परात्पर। गृहाण पाद्यं मद्दत्तं पार्वतीसहितेश्वर। भवायदेवाय० पाद्यंनमः॥ "पाद्यशेष छोडना"॥ पुनः शन्नोदेवी०॥ "यह द्रव्य छोडना" आपः क्षीरं कुशाग्राणि घृतं च दधि तण्डुलाः। यवाः सिद्धार्थकाश्चेति ह्यर्घ्यमष्टाङ्गमुच्यते। भगवन्तोऽर्घ्यं॥ २॥ त्र्यम्बकेश सदाधार विपदां प्रतिघातक। अर्घ्यं गृहाण देवेश सम्पत्सर्वार्थसाधक॥

CC-0. Narinder Safaya Collection. Digitized by eGangotri

भवदेव शर्वदेव रुद्रदेव पशुपते देव उग्रदेव भीमदेव महादेव ईशानदेव पार्वतीसहितपरमेश्वर इदं वोऽर्घ्यं नमः ॥ त्रिपुरान्तक दीनार्त्तिनाश श्रीकण्ठ तुष्टये। गृहाणाचमनं देव पवित्रोदककल्पितम् ॥ भवायदेवाय० आचमनीयं नमः ॥ त्रिकालकालकालेश संहारकरणोद्यत। स्नानं तीर्थाहृतैस्तोयैर्गृहाण परमेश्वर॥ भवाय देवाय० मन्त्रस्नानीयं नमः॥ पानीयान्तरितैः पयोदधिघृतैः क्षौद्रेक्षुभिः सौषधैर्व्रीह्यद्भिः कुसुमोदकैः फलजलैः सिद्धार्थलाजोदकैः। गन्धाद्भिः शुभहेमरत्नसलिलैरित्थं सदा चोत्तमैर्दद्यात्पञ्चदशाम्बुना सह महास्नानानि शम्भोः क्रमात् ॥ असंख्याताः सहस्राणि ये रुद्रा अधि भूम्याम् । तेषां सहस्रयोजनेव धन्वानि तन्मसि ॥ १ ॥ येऽस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । तेषां सह० ॥ २ ॥ ये नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपाश्रिताः । तेषां० ॥ ३ ॥ ये नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । तेषां० ॥ ४ ॥ ये वनेषु शिल्पिञ्जरा नीलग्रीवा विलोहिताः । तेषां० ॥ ५ ॥ येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषां० ॥ ६ ॥ ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषां० ॥ ७ ॥ ये पथीनां पथि रक्षय ऐडमृदायव्युधः । तेषां० ॥ ८ ॥ ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः । तेषां० ॥ ९ ॥ य एतावन्तो वा भूयांसो वा दिशो रुद्रा वितिष्ठिरे । तेषां० ॥ १० ॥ ॐनमो अस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥१॥ ॐनमो अस्तु



CC-0. Narinder Safaya Collection. Digitized by eGangotri

रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवस्तेभ्यो दश० ॥२॥ ॐनमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्यो० ॥३॥ भवाय देवाय० पञ्चदशस्नानानि नमः ॥ ॐनमोदेवेभ्यः "कण्ठोपवीती" स्वाहा ऋषिभ्यः । "अपसव्येन" । स्वधा पितृभ्यः "सव्येन" आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं सचराचरं जगत्तृप्यतु ॥३॥ एवमस्तु ॥ "फिर पात्रमें पानी 'ॐनमः शिवाय' इस मन्त्रसे सात वार मंत्रित करके अपने माथेतक लेके अमृतसे भराहुआ ध्यान करके देवके सिरपर छोडना । इह मन्त्रगुडक कहते हैं"॥ "आरात्रिका निकालना"गृह्णन्तु भगवद्भक्ता भूताः प्रासादबाह्यगाः । पञ्चभूताश्च ये भूतास्तेषामनुचराश्च ये । ते तृप्यन्तु वौषट् ॥ "देवके पादोंका पानी नेत्रोंके मलना"॥ भगस्य हृदयं लिङ्गं लिङ्गस्य हृदयं भगः । तस्मै ते भगलिङ्गाय उमारुद्राय वै नमः ॥ उत्तिष्ठ भगवञ्छम्भो उत्तिष्ठ गिरिजापते । उत्तिष्ठ त्रिजगन्नाथ त्रैलोक्ये मङ्गलं कुरु ॥ "शम्भू बिठाने जगाह फूल छोडछोड कर पडना" आसनाय नमः पद्मासनाय नमः । वृषभासनाय नमः ज्ञानासनाय नमः ॥ किमासनं ते वृषभासनाय किंभूषणं वासुकिभूषणाय । वित्तेशभृत्याय किमस्ति देयं वागीश किं ते वचनीयमस्ति ॥ "महिम्नः पारस्तोत्र पढते हुई देवको अनुलेपन चन्दनादिद्रव्योंसे करना" ॥ "वस्त्र पहनना" ॥ कालाग्निरुद्र सर्वज्ञ वरदाभयदायक । वस्त्रं गृहाण देवेश दिव्यवस्त्रोपशोभित । भवाय देवाय० वस्त्रं परिकल्पयामि नमः । "जन्यो पहनना" ॥ सुवर्णतारैरचितं दिव्ययज्ञोपवीतकम् । नीलकण्ठ मया दत्तं गृहाण

CC-0. Narinder Safaya Collection. Digitized by eGangotri

मदनुग्रहात् । भवाय दे० यज्ञोपवीतं परिकल्पयामि नमः ॥ "गन्ध चडाना" ॥ सर्वेश्वर जगद्वन्द्य दिव्यासनसुसंस्थित । गन्धं गृहाण देवेश दिव्यगन्धोपशोभितम् । भवाय० समालभनं गन्धो नमः । "अक्षत और फूल चडाना" ॥ सदाशिव शिवानन्द प्रधानकरणेश्वर । पुष्पाणि बिल्वपत्राणि विचित्राणि गृहाण मे ॥ भवाय दे० । अनन्ताय नमः । सूक्ष्माय शिवोत्तमाय एकनेत्राय एकरुद्राय त्रिमूर्तये श्रीकण्ठाय शिखण्डिने नन्दिने महाकालाय नमः ॥ अभीष्टसिद्धिं मे देहि शरणागतवत्सल । भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ गणपतये नमः वृषभाय कुमाराय अम्बिकायै चण्डेश्वराय नमः । अभीष्ट० द्वितीयावर० ॥ इन्द्राय वज्रहस्ताय अग्नये शक्तिहस्ताय यमाय दण्डहस्ताय नैर्ऋतये खड्गहस्ताय वरुणाय पाशहस्ताय वायवे ध्वजहस्ताय कुबेराय गदाहस्ताय ईशानाय त्रिशूलहस्ताय ब्रह्मणे पद्महस्ताय विष्णवे चक्रहस्ताय नमः ॥ अभीष्ट० तृतीयाव० ॥ जयायै नमः विजयायै सुभगायै दुर्भगायै जयन्त्यै कुहिन्यै अपराजितायै करात्यै नमः ॥ अभीष्टसि० चतुर्था० ॥ सूर्याय नमः चन्द्रमसे भौमाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतवे ॥ अभीष्ट० पञ्चमा० ॥ अनन्तनागराजाय नमः वासुकिनाग० तक्षकना० पद्म० महापद्म० कार्कोट० शङ्खपाल० कुलिक० । अभीष्ट० षष्ठमाव० । वज्राय फट् नमः शक्तये फ० दण्डाय० खड्गाय० पाशाय० ध्वजाय० गदायै० त्रिशूलाय० पद्माय० चक्राय फट्नमः । अभीष्टसिद्धिं मे देहि शरणागतवत्सल । भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम् ॥ शिवाय

CC-0. Narinder Safaya Collection. Digitized by eGangotri

पार्थिवेश्वरचिन्तामणये सपरिवाराय सानुचराय अर्घो नमः पुष्पं नमः ॥ "धूप चडाना" ॥ महादेव मृडानीश जगदीश निरञ्जन । धूपं गृहाण देवेश साज्यं गुग्गुलकल्पितम् ॥ भवाय० धूपं परिकल्पयामि नमः ॥ "रत्नदीप चडाना" ॥ हिरण्यबाहो सेनानीरोषधीनां पते शिव । दीपं गृहाण कर्पूर-कपिलाज्यत्रिवर्तिकम् । भवाय० रत्नदीपं परिकल्पयामि नमः ॥ मयूरपुच्छैर्देवेश शुभ्रैश्चामरकैस्तथा । ध्वजं छत्रं वीजनं च गृहाण परमेश्वर ॥ "जय सर्वेति चामरस्तोत्रों को पडके" । भवाय० चामरं परिकल्पयामि नमः ॥ "आईना दिखाना" ॥ यस्य दर्शनमात्रेण विश्वं दर्पणबिम्बवत् । तस्मै ते परमेशाय मकुरं कल्पयाम्यहम् ॥ भवाय० आदर्शं परिकल्पयामि नमः ॥ एताभ्यो देवताभ्यः दीपो नमः धूपो नमः ॥ शिवस्य सानुचरस्याऽर्घ्यदानाद्यऽर्चनविधिः सर्वः परिपूर्णोस्तु ॥ "मधु-पर्क देना" ॥ क्षीराज्यमधुसंमिश्रं शुभ्रदध्नासमन्वितम् । षड्रसैश्च समायुक्तं गृहाणान्नं निवेदये । भवाय० चरुं परिकल्पयामि नमः ॥ "फूलोंकी अञ्जलि चडावना" ॥ हर विश्वाखिलाधार निराधार निराश्रय । पुष्पाञ्जलिमिमं शम्भो गृहाण वरदो भव ॥ भवाय० पुष्पाञ्जलिं समर्पयामि नमः ॥ "फल चडाना" ॥ राजराजाधिदेवेश निराधार निरास्पद । फलं गृहाण मद्दत्तं नारिकेलादिकं शुभम् । भवाय० फलं समर्पयामि नमः ॥ "ताम्बूल चडाना" ॥ शाश्वतात्मन्महानन्द मदनान्तक धूर्जटे । गृहाण पूगताम्बूलदलपत्रादिसंयुतम् । भवाय० ताम्बूलं परि० ॥ "आध प्रक्रम देना" ॥ यानि कानि च पापानि

CC-0. Narinder Safaya Collection. Digitized by eGangotri

ब्रह्महत्यादिकानिच । तानि सर्वाणि नश्यन्ति शिवस्यार्धप्र-दक्षिणात् "षडक्षरपञ्चाक्षर स्तोत्र पडके अष्टाङ्ग प्रणाम देना" ॥ मृडानीशाद्य मे सर्वानऽपराधानऽनेकशः । क्षम स्वामिन्प्रणामं मे गृहाणाष्टाङ्गसंयुतम् ॥ उभाभ्यां जानुभ्यां पाणिभ्यां शिरसा उरसा मनसा वचसा च नमस्कारं करोमि नमः ॥ अन्नं नमः २ आज्यं २ अद्यदिनेऽद्य यथासङ्कल्पात्सिद्धिरस्तु अन्नहीनं क्रियाहीनं विधिहीनं द्रव्यहीनं मन्त्रहीनं च यद्गतं तत्सर्वमऽच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ शन्नो देवी० ॥ भवाय० अपोशानं नमः ॥ पुनः शन्नो देवी० ॥ भवाय० दक्षिणायै तिलहिरण्यरजतनिष्कर्णं ददानि ॥ एता देवताः सदक्षिणाऽनेन प्रीयन्तां प्रीताः सन्तु ॥ "नैवेद्य देना" ॥ अमृतेशमुद्रयाऽमृतीकृत्याऽमृतमस्तु अमृतायतां नैवेद्यं सावित्राणि सावित्रस्य देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादधे । भवाय० नमो नैवेद्यं निवेदयामि नमः ॥ आकाशमातृभ्यो बलिं नमः समालभनं गन्धो नमः ॥ अर्घो नमः ॥ पुष्पं नमः ॥ कर्पूरगौरं० भवाय० फलादि समर्पयामि नमः ॥ क्षां क्षेत्राधिपतयेऽन्नं नमः रां राष्ट्राधिपतयेऽन्नं नमः सर्वाभयवरप्रद मयि पुष्टिं पुष्टिपतिर्दधातु ॥ "नित्यकर्म करके पृच्छा करना" ॥ तन्महेशाय विद्महे वाग्विशुद्धाय धीमहि तन्नः शिवः प्रचोदयात् ३ । ॐतत्सद्ब्रह्माऽद्य तावत्० भवस्य देवस्य० अच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ एताभ्यो देवताभ्यो यवोदकं नम उदकतर्पणं नमः ॥ आपन्नोसि शरण्योसि सर्वाऽवस्थासु सर्वदा । भगवंस्त्वां प्रपन्नोसि रक्ष मां शरणागतम् । क्षमापणनिर्वाण-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

स्तोत्रादि पठित्वा । आह्वानं नैव जानामि नैव जानामि पूजनम् । पूजाभागं न जानामि क्षम्यतां परमेश्वर । उभाभ्यामिति अष्टाङ्ग-प्रणामं करोमि नमः ॥ "तर्पण करना" नमो ब्रह्मणे नमो अस्त्व-ग्नये नमः पृथिव्यै नम ओषधिभ्यः नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते कृणोमि । इत्येतासामेव देवतानां सलोकतां सायुज्यं सार्ष्टिं सामीप्यमाप्नोति य एवं विद्वान् स्वाध्याय-मधीते ॥ पूजितोसि मया भक्त्या भगवन्गिरिजापते । सगौरीको मम स्वान्तं विश विश्रान्तिहेतवे ॥ मनस्यान्तर्गतं मन्त्रं मन्त्र-स्यान्तर्गतं नमः । मनोमन्त्रमयं दिव्यमेकपुष्पं शिवार्चनम् ॥ इति शिवपूजा सम्पूर्णा ॥

---

## अथ गणेशस्तवराजः ॥

ॐविघ्नेशो नः स पायाद्विहृतिषु जलधिं पुष्कराग्रेण पीत्वा यस्मिन्नुद्धृत्य हस्तं वमति तदऽखिलं दृश्यते व्योम्नि देवैः । क्वाप्यम्भः क्वापि विष्णुः क्वचन कमलभूः क्वाप्यऽनन्तः क्व च श्रीः क्वाप्यौर्वः क्वापि शैलः क्वचन मणिगणः क्वापि नक्रादिसत्वाः ॥ निर्विघ्नविश्वनिर्माणसिद्धये यदनुग्रहम् । मन्ये स वव्रे धातापि तस्मै विघ्नजिते नमः ॥ सर्गारम्भेऽप्यजाताय बीजरूपेण तिष्ठते । धात्रा कृतप्रणामाय गणाधिपतये नमः ॥ गणेशाय नमः प्रह्ववाञ्छिताम्बुजभानवे । सितदंष्ट्रांकुरस्फीतविघ्नौघतिमिरे-न्दवे ॥ प्रणमाम्यजमीशानं योगशास्त्रविशारदम् । निःशेषगणवृ-न्दस्य नायकं सुविनायकम् ॥ "श्रीब्रह्मोवाच" ॥ भगवञ्छ्रो-तुमिच्छामि विस्तरेण यथायथम् । स्तवराजस्य माहात्म्यं स्वरूपं

CC-0. Narinder Safaya Collection. Digitized by eGangotri

च विशेषतः ॥ "श्रीनन्दिकेश्वर उवाच" ॥ स्तवराजस्य माहात्म्यं प्रवक्ष्यामि समासतः ॥ शृणुष्वावहितो भूत्वा सर्वसिद्धिकरं परम् । कर्मणा मनसा वाचा ये प्रपन्ना विनायकम् ॥ ते तरन्ति महाघोरं संसारं कामवर्जिताः ॥ सकृच्च जप्त्वा स्तवराजमुत्तमं तरत्यशेषं भवपाशपञ्जरम् । विमुच्यते संसृतिसागरान्नरो विभूतिमाप्नोति सुरैः सुदुर्लभाम् ॥ यत्फलं लभते जप्त्वा स्वरूपं चापि यादृशम् । यः प्रातरुत्थितो विद्वान्ब्राह्मे वापि मुहूर्तके । विषुवायनकालेषु पुण्ये वा समयान्तरे ॥ सर्वदा वा जपञ्जन्तुः स्तवराजं स्तवोत्तमम् । यत्फलं लभते मर्त्यः तच्छृणुष्व चतुर्मुख ॥ गङ्गाप्रवाहवत्तस्य वाग्विभूतिर्विजृम्भते ॥ बृहस्पतिसमो बुद्ध्या पुरन्दरसमः श्रिया । तेजसादित्यसङ्काशो भार्गवेण समो नये ॥ धनदेन समो दाने तथा वित्तपरिग्रहे । धर्मराजसमो न्याये शिवभक्तो मया समः ॥ प्रतापे वह्निसंकाशः प्रसादे शशिना समः । बलेन महता तुल्यो भवता ब्रह्मवर्चसे ॥ सर्वतत्वार्थविज्ञाने मयापि समतां व्रजेत् । एवमेतत्रिसन्ध्यं वै जपन्स्तवमनुत्तमम् ॥ सर्वान्कामान्नरः प्राप्य भुक्त्वा भोगान्यथेप्सितान् । सशरीरः सुरेन्द्रस्य पदं न्यस्यति मूर्धनि ॥ प्राप्याष्टगुणमैश्वर्यं भुक्त्वा भोगान्सुपुष्कलान् । अक्षयो वीतशोकश्च निरातङ्को निरामयः ॥ जरामरणनिर्मुक्तो वेदशास्त्रार्थकोविदः । सिद्धचारणगन्धर्वदेवविद्याधरादिभिः ॥ संस्तूयमानो मुनिभिः शंस्यमानो दिनेदिने । विचरत्यऽखिलांल्लोकान्बन्धुवर्गैः समं नरः ॥ एवं चिराय निर्वाह्य देवस्यानुचरो भवेत् । स्तवराजं सकृज्जप्त्वा मुच्यते सर्वकिल्बिषैः ॥ सर्वसिद्धि-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

मवाप्नोति पुनात्यासप्तमं कुलम् । नाशयेद्विघ्नसंघातांस्तेन वैनायकं स्मृतम् ॥ स्तवराजमनुस्मरञ्जपन्हृदयाग्रे विलिखन्पठन्नपि । स सुरासुरसिद्धचारणैर्मुनिभिः प्रत्यहमेव पूज्यते ॥ तरति च भवचक्रं सर्वमोहं निहन्ति क्षिपति च परवादं मान्यते बन्धुवर्गैः । अखिलमपि च लोकं क्षेमतामाशु नीत्वा व्रजति यतिभिरीड्यं शाश्वतं धाम मर्त्यः ॥ यो जपति स्तवराजमशोकः क्षेमतमं पदमेति मनुष्यः । चारणसिद्धसुरैरभिवन्द्यो याति पदं परमं स विमुक्तः ॥ जपेद्यः स्तवराजाख्यमिमं प्रातः स्तवोत्तमम् । तस्यापचारं क्षमते सर्वदैव विनायकः ॥ सर्वान्निहन्ति वै विघ्नान्विपदश्च समन्ततः । अशेषाभिर्गणाध्यक्षः सम्पद्भिरभिषिञ्चति ॥ अस्य च प्रणता लक्ष्मीः कटाक्षानुविधायिनी । किं करोमीति वै भीत्या पुरस्तादेव तिष्ठति ॥ तस्मान्निःश्रेयसं गन्तुमतिभक्त्या विचक्षणः । स्तवराजं जपेज्जन्तुर्धर्मकामार्थसिद्धये ॥ आधिव्याध्यस्त्रशस्त्राग्नितपःपङ्कार्णवादिषु । भयेष्वन्येषु चाप्येतत्स्मरन्मुक्तो भवेन्नरः ॥ स्तवराजं सकृज्जप्त्वा मार्गं गच्छति मानवः । न जातु जायते तस्य चौरव्याघ्रादिभिर्भयम् ॥ यथा वरिष्ठो देवानामशेषाणां विनायकः । तथा स्तवो वरिष्ठोयं स्तवानां शम्भुनिर्मितः ॥ अवतीर्णो यदा देवो विघ्नराजो विनायकः । तदा लोकोपकारार्थं प्रोक्तोयं शम्भुना स्वयम् ॥ विनायकप्रियकरो देवस्य हृदयङ्गमः । जप्यः स्तवोयं यत्नेन धर्मकामार्थसिद्धये ॥ "अस्य श्रीमहागणपतिस्तवराजमन्त्रस्य ईश्वर ऋषिः, नानावृत्तानि छन्दांसि विनायको देवता तत्पुरुष इति बीजं एकदन्त इति शक्तिः आ-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

त्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं धर्मार्थ-
कामसिद्ध्यर्थे पाठे विनियोगः" ॥ ध्यानं ॥ जेतुं यस्त्रिपुरं
हरेण हरिणा व्याजाद्बलेर्बन्धने स्रष्टुं वारिरुहोद्भवेन विधिना
शेषेण धर्तुं धराम् । पार्वत्या महिषासुरप्रमथने सिद्धाधिपैर्मुक्तये
ध्यातः पञ्चशरेण लोकविजये पायात्स नागाननः ॥ ॥
"ईश्वर उवाच" ॥ ॐकारममृतं ब्रह्म शिवमक्षरमव्ययम् ।
यमामनन्ति वेदेषु तं प्रपद्ये विनायकम् ॥ यतः प्रवृत्तिर्जगतां यः
साक्षी हृदयस्थितः । आधारभूतो विश्वस्य तं प्रपद्ये विनायकम् ॥
यस्य प्रसादाच्छक्राद्याः प्राणन्ति निमिषन्ति च । प्रवर्तकं तं
लोकानां प्रणमामि विनायकम् ॥ शिखाग्रे द्वादशाङ्गुल्ये स्थितं
सूक्ष्मतनुं विभुम् । युञ्जन्ति यं मरीच्याद्यास्तं नमामि गणाधि-
पम् ॥ लीलया लोकरक्षार्थं द्विधाभूतो महेश्वरः । यः स्वयं
जगतः साक्षी तं वन्दे द्विरदाननम् ॥ विघ्नेश्वरं विधातारं
धातारं जगतामपि । प्रणमामि गणाध्यक्षं प्रणतार्तिविनाशनम् ॥
उत्सङ्गतल्पे यो देव्या भवान्याः क्रीडते विभुः । बालो हरन्म-
नस्तस्यास्तं प्रपद्ये विनायकम् ॥ विधाय भूषणैश्चित्रैर्वेशकर्म
मनोरमम् । यं दृष्ट्वा पश्यतीशानी तं प्रपद्ये विनायकम् ॥
लीलया यः सृजंल्लोकान्भिन्दन्नपि मुहुर्मुहुः । संक्रीडते महा-
सत्वस्तं नतोस्मि गणाधिपम् ॥ सिन्दूरितमहाकुम्भस्तुङ्गदन्तः
सुभैरवः । भिनत्ति दैत्यकरिणस्तं वन्दे द्विरदाननम् ॥ यस्य
मूर्तिं व्रजन्त्याशु मदामोदानुषङ्गिणः । भ्रमरास्तीव्रसंरावास्तं
नमामि विनायकम् ॥ गम्भीरभीमनिनदं श्रुत्वा यद्बृंहितं
क्षणात् । पतन्त्यसुरनागेन्द्रास्तं वन्दे द्विरदाननम् ॥ यो भि-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

नत्ति गिरीन्सर्वान्घोरनिर्घातभैरवैः । रवैः सन्त्रासजननैस्तं वन्दे द्विरदाननम् ॥ लीलया प्रहता येन पादाभ्यां धरणी क्षणात् । संशीर्यते सशैलौघा तं वन्दे चण्डविक्रमम् ॥ यत्कराताडनैर्भिन्नमम्भः शतसहस्रधा । विशीर्यते समुद्राणां तं नतोस्मि गणाधिपम् ॥ विमुखा यत्र दृश्यंते भ्रष्टवीर्याः पदच्युताः । निष्प्रभा विबुधाः सद्यस्तं प्रपद्ये विनायकम् ॥ यद्भ्रूप्रणिहितां लक्ष्मीं लभन्ते वासवादयः । स्वतन्त्रमेकं नेतारं विघ्नराजं नमाम्यहम् ॥ यत्पादपांसुनिचयं बिभ्राणा मणिमौलिषु । अमरा बहु मन्यन्ते तं नतोस्मि गणाधिपम् ॥ वेदान्तगीतं पुरुषं वरेण्यमऽभयप्रदम् । हिरण्मयपुरान्तःस्थं तमस्मि शरणं गतः ॥ चित्सुधानन्दसन्मात्रं परानन्दस्वरूपिणम् । निष्कलं निर्मलं साक्षाद्विनायकमुपैमि तम् ॥ अनपायं च सद्भूतं भूतिदं भूतिवर्धनम् । नमामि सत्यविज्ञानमनन्तं ब्रह्मरूपिणम् ॥ अनाद्यन्तं महादेवप्रियपुत्रं मनोरमम् । द्विपाननं विभुं साक्षादात्मानं तं नमाम्यहम् ॥ विश्वामरेश्वरैर्वन्द्यमाधारं जगतामपि । प्रणमामि गणाध्यक्षं प्रणताज्ञानमोचनम् ॥ शिखाग्रे द्वादशाङ्गुल्ये स्थितं स्फटिकसन्निभम् । गोक्षीरधवलाकारं प्रणमामि गजाननम् ॥ अनाधारं नवाधारमनन्ताधारसंस्थितम् । धातारं च विधातारं तमस्मि शरणं गतः ॥ अनन्तदृष्टिं लोकादिमनन्तं विद्रुमप्रभम् । अप्रतर्क्यमनिर्देश्यं निरालम्बं नमाम्यहम् ॥ भूतालयं जगद्योनिमणीयांसमणोरपि । स्वसंवेद्यमसंवेद्यं वेद्यावेद्यं नमाम्यहम् ॥ प्रमाणप्रत्ययातीतं हंसमव्यक्तलक्षणम् । अनाविलमनाकारं तमस्मि शरणं गतः ॥ विश्वाकारमनाकारं विश्वावासमनामयम् । सकलं निष्कलं

CC-0. Narinder Safaya Collection. Digitized by eGangotri

नित्यं नित्यानित्यं नमाम्यहम् ॥ संसारवैद्यं सर्वज्ञं सर्वभेषजभेषजम् । आत्मानं सदसद्व्यक्तं धातारं प्रणमाम्यहम् ॥ भ्रूमध्ये संस्थितं देवं नाभिमध्ये प्रतिष्ठितम् । हृन्मध्ये दीपवत्संस्थं वन्दे सर्वस्य मध्यगम् ॥ हृत्पुण्डरीकनिलयं सूर्यमण्डलनिष्ठितम् । तारकान्तरसंस्थानं तारकं तं नमाम्यहम् ॥ तेजस्विनं विकर्तारं सर्वकारणकारणम् । भक्तिगम्यमहं वन्दे प्रणवप्रतिपादितम् ॥ अन्तर्योगरतैर्युक्तैः कल्पितैः स्वस्तिकासनैः । बद्धं हृत्कर्णिकामध्ये ध्यानगम्यं नमाम्यहम् ॥ ध्येयं दुर्ज्ञेयमद्वैतं त्रयीसारं त्रिलोचनम् । आत्मानं त्रिपुरारातेः प्रियसूनुं नमाम्यहम् ॥ स्कन्दप्रियं स्कन्दगुरुं स्कन्दस्याग्रजमेव च । स्कन्देन सहितं शश्वन्नमामि स्कन्दवत्सलम् ॥ नमस्ते विघ्नराजाय भक्तविघ्नविनाशिने । विघ्नाध्यक्षाय विघ्नानां निहन्त्रे विश्वचक्षुषे ॥ विघ्नदात्रेऽप्यभक्तानां भक्तानां विघ्नहारिणे । विघ्नेश्वराय वीराय विघ्नेशाय नमोनमः ॥ कुलाद्रिमेरुकैलासशिखराणां प्रभेदिने । दन्तभिन्नाभ्रमालाय करिराजाय ते नमः ॥ किरीटिने कुण्डलिने मालिने हारिणे तथा । नमो मौञ्जीसनाथाय जटिने ब्रह्मचारिणे ॥ डिण्डिमुण्डाय चण्डाय कमण्डलुधराय च । दण्डिने चैव मुण्डाय नमोऽध्ययनशीलिने ॥ वेदाध्ययनयुक्ताय सामगानपराय च । त्र्यक्षाय च वरिष्ठाय नमश्चन्द्रशिखण्डिने ॥ कपर्दिने करालाय शंकरप्रियसूनवे । सुताय हैमवत्याश्च हर्त्रे च सुरविद्विषाम् ॥ ऐरावणादिभिर्दिव्यैर्दिग्गजैः संस्तुताय च । स्वबृंहितपरित्रस्तैर्नमस्ते मुक्तिहेतवे ॥ कूष्माण्डगणनाथाय गणानां पतये नमः । वज्रिणाराधितायैव वज्रिवज्रनिवारिणे ॥ पूष्णो

CC-0. Narinder Safaya Collection. Digitized by eGangotri

दन्तभिदे साक्षान्महतां भीषणाय च । ब्रह्मणश्च शिरोहर्त्रे विव- स्वद्धन्धनाय च ॥ अग्नेश्चैव सरस्वत्या इन्द्रस्य च बलच्छिदे । भैरवाय सुभीमाय भयानकरवाय च ॥ बिभीषणाय भीष्माय नागाभरणधारिणे । प्रमत्ताय प्रचण्डाय वक्रतुण्डाय ते नमः ॥ हेरम्बाय नमस्तुभ्यं प्रलम्बजठराय च । आखुवाहाय देवाय चैक- दन्ताय ते नमः ॥ शूर्पकर्णाय शूराय परश्वधधराय च । सृणिहस्ताय धीराय नमः पाशासिपाणये ॥ धारणाय नम- स्तुभ्यं धारणाभिरताय च । धारणाभ्यासयुक्तानां पुरस्तात्सं- स्तुताय च ॥ प्रत्याहाराय वै तुभ्यं प्रत्याहाररताय च । प्रत्या- हाररतानां च प्रत्याहारस्थितात्मने ॥ विघ्नाध्यक्षाय दक्षाय लोकाध्यक्षाय धीमते । भूताध्यक्षाय भव्याय गणाध्यक्षाय ते नमः ॥ योगपीठान्तरस्थाय योगिने योगधारिणे । योगिनां हृदिसंस्थाय योगगम्याय ते नमः ॥ ध्यानाय ध्यानगम्याय शिवध्यानपराय च । ध्येयानामपि ध्येयाय नमो ध्येयतमाय च ॥ सप्तपातालपादाय सप्तद्वीपोरुजंघिने । नमो दिग्बाहवे तुभ्यं व्योमदेहाय ते नमः ॥ सोमसूर्याग्निनेत्राय ब्रह्मविद्याम- दाम्भसे । ब्रह्माण्डकुण्डपीठाय सामघोषस्वनाय च ॥ ज्योति- र्मण्डलपुच्छाय हृदयालानकाय च । ध्यानार्द्रबद्धपादाय पूजाधोरणधारिणे ॥ सोमार्कबिम्बघण्टाय दिक्करीन्द्रवियोगिने । आकाशसरसो मध्ये क्रीडागहनशालिने ॥ सुमेरुदन्तकोशाय पृथिवीस्थलगाय च । सुघोषाय सुभीमाय सुरकुञ्जरभेदिने ॥ हेमाद्रिकूटभेत्त्रे च दैत्यदानवमर्दिने । गजाकाराय देवाय गज- राजाय ते नमः ॥ ब्रह्मणे ब्रह्मरूपाय ब्रह्मगोत्रेऽव्ययाय च । ब्रह्मघ्ने

CC-0. Narinder Safaya Collection. Digitized by eGangotri

ब्राह्मणायैव ब्रह्मणः प्रियबन्धवे ।। यज्ञाय यज्ञगोत्रे च यज्ञानां फलदायिने । यज्ञहर्त्रे यज्ञकर्त्रे सर्वयज्ञमयाय च ।। सर्वनेत्राधिवासाय सर्वैश्वर्यप्रदायिने । गुहाशयाय गुह्याय योगिने ब्रह्मवादिने ।। १०० ।। "ॐ गंतत्पुरुषाय विद्महे, वक्रतुण्डाय धीमहि, तन्नो दन्ती प्रचोदयात्" । ३ । एकाक्षरपरायैव मायिने ब्रह्मचारिणे । भूतानां भुवनेशानां पतये पापहारिणे ।। सर्वारम्भनिहर्त्रे च विमुखानां निजार्चने । नमो नमो गणेशाय विघ्नेशाय नमो नमः ।। विनायकाय वै तुभ्यं विकृताय नमोनमः । नमस्तुभ्यं जगद्धात्रे नमस्तुभ्यं वियोगिने ।। नमस्तुभ्यं त्रिनेत्राय त्रिनेत्रप्रियसूनवे । सप्तकोटिमहामन्त्रैर्मन्त्रितावयवाय ते ।। मन्त्राय मन्त्रिणां नित्यं मन्त्राणां फलदायिने । लीलया लोकरक्षार्थं विभक्तनिजमूर्तये ।। स्वयं शिवाय देवाय लोकक्षेमानुपालिने । नमोनमः क्षमाभर्त्रे नमः क्षेमतमाय च ।। दयामयाय देवाय सर्वभूतदयालवे । दयाकर दयारूप दयामूर्ते दयापर ।। दयाप्राप्य दयासार दयाकृतिरतात्मक । जगतां तु दयाकर्त्रे सर्वकर्त्रे नमो नमः ।। नमः कारुण्यदेहाय वीराय शुभदन्तिने । भक्तिगम्याय भक्तानां दुःखहर्त्रे नमोस्तु ते ।। त्रिपुरं दग्धुकामेन पूजिताय त्रिशूलिना । दयाशील दयाहार दयापर नमोस्तु ते ।। नमः समस्तगीर्वाणवन्दिताङ्घ्रियुगाय ते । जगतां तस्थुषां भर्त्रे विघ्नहर्त्रे नमोस्तु ते ।। नमो नमस्ते गणनायकाय सुनायकायाखिलनायकाय । विनायकायाभयदायकाय नमः शुभानामुपनायकाय ।। गणाधिराजाय गणानुशास्त्रे गजाधिराजाय गजाननाय । शतानननायामितमाननाय नमो नमो दैत्यविना-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

शनाय ॥ अनामयायामलधीमयाय स्वमायया विष्टजगन्मयाय ।
अमेयमायाविकसन्मयाय नमो नमस्तेस्तु मनोमयाय ॥ नमस्ते
समस्ताधिनाथाय कर्त्रे नमस्ते समस्तोरुविस्तारभाजे । नमस्ते
समस्ताधिकायातिभूम्ने नमस्ते पुनर्व्यस्तविन्यस्तधाम्ने ॥ पात्रे
सुराणां प्रमथेश्वराणां शास्त्रेऽनुशास्त्रे सचराचरस्य । नेत्रे प्रनेत्रे
च शरीरभाजां धात्रे वराणां भवते नमोऽस्तु ॥ नमोस्तु ते विघ्न-
विनाशकाय नमोस्तु ते भक्तभयापहाय । नमोस्तु ते मुक्तमनस्थि-
ताय नमश्च भूयो गणनायकाय ॥ अखिलभुवनभर्त्रे सम्पदा-
मेकदात्रे निखिलतिमिरभेत्रे निष्कलायाव्ययाय । प्रणतमनुज-
गोप्त्रे प्राणिनां त्राणकर्त्रे सकलविबुधशास्त्रे विश्वनेत्रे नमोऽस्तु ॥
दशनकुलिशभिन्नैर्निर्गतैर्दिग्गजानां विलसितशुभदन्तं मौक्तिकै-
श्चन्द्रगौरैः । भवनमुपसरन्तं प्रेक्ष्य गौरी भवन्तं सुदृढमथ करा-
भ्यां श्लिष्यते प्रेमनुन्ना ॥ मृदुनि ललितशीते तल्परङ्गे भवान्याः
शुभविलसितभावां नृत्यलीलां विधाय । अचलदुहितुरङ्कादऽ-
ङ्कमन्यं विसर्पन्पितुरुपहरसि त्वं नृत्यहर्षोपहारम् ॥ भुजगवल-
यितेनोपस्पृशन्पाणिना त्वां सरभसमथ बाह्वोरन्तराले निवेश्य ।
कलमधुरसुगीतं नृत्तमालोकयंस्ते कलमऽविकलतालं चुम्बते
हस्तपद्मे ॥ कुवलयशतशीतैर्भूरिकल्हारहृद्यैस्तव मुहुरपि गात्र-
स्पर्शनैः संप्रहृष्यन् । क्षिपति च सुविशाले स्वाङ्कमध्ये भवन्तं
तव मुहुरनुरागान्मूर्ध्नि जिघ्रन्महेशः ॥ बालो बालपराक्रमः
सुरगणैः संप्रार्थ्यसेऽहर्निशं गायन्किंपुरुषाङ्गनाविरचितैः स्तोत्रै-
रभिष्टूयसे । हाहाहूहुकतुम्बुरुप्रभृतिभिस्त्वं गीयसे नारद
स्तोत्रैरद्भुतचेष्टितैः प्रतिदिनं प्रोद्घोषते सामभिः ॥ त्वां नमन्ति
सुरसिद्धचारणास्त्वां यजन्ति निखिला द्विजातयः । त्वां पठन्ति

CC-0. Narinder Safaya Collection. Digitized by eGangotri

मुनयः पुराविदस्त्वां स्मरन्ति यतयः सनातनाः ॥ परं पुराणं गुणिनं महान्तं हिरण्मयं पुरुषं योगगम्यम् । यमामनन्त्यात्मभुवं मनीषिणो विपश्चितं कविमप्यक्षयं च ॥ गणानान्त्वा गणनाथं सुरेन्द्रं कविं कवीनामतिमेध्यविग्रहम् । ज्येष्ठराजमृषभं केतुमेकमा नः शृण्वन्नूतिभिः सीद शश्वत् ॥ नमो नमो वाङ्मनसातिभूमये नमो नमो वाङ्मनसैकभूतये । नमो नमोनन्तसुखैकदायिने नमो नमोनन्तसुखैकसिन्धवे ॥ नमो नमः शाश्वतशान्तिहेतवे क्षमादयापूरितचारुचेतसे । गजेन्द्ररूपाय गणेश्वराय ते परस्य पुंसः प्रथमाय सूनवे ॥ नमो नमः कारणकारणाय ते नमो नमो मङ्गलमङ्गलात्मने । नमो नमो वेदविदां मनीषिणामुपासनीयाय नमो नमो नमः ॥ १३० ॥ "श्रीईश्वर उवाच" ॥ वैनायकं स्तवं पुण्यं सर्वपापप्रणाशनम् । चिन्ताशोकप्रशमनमायुरारोग्यवर्धनम् ॥ नृपाणां सततं रक्षा द्विजानां च विशेषतः । स्तवराज इति ख्यातं सर्वसिद्धिकरं परम् ॥ यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते। रूपं वीर्यं बलं प्रज्ञां यशश्चायुः समन्वितम् ॥ मनीषां सिद्धिमारोग्यं श्रियमप्यक्षयिष्णुताम् । सर्वलोकाधिपत्यं च सर्वदेवाधिराजताम् ॥ प्राप्याष्टगुणमैश्वर्यं प्राप्य भूतिं च शाश्वतीम् । उद्धृत्य सप्तमं वंशं दुस्तराद्भवसागरात् ॥ काञ्चनेन विमानेन शतनागायुतेन च । विचरत्यखिलांल्लोकान्सशरीरो गणाधिपः ॥ मत्प्रियश्च भवेन्मर्त्यः सर्वदेवप्रियः सदा । प्रियो विनायकस्यापि प्रियोस्माकं विशेषतः ॥ सङ्कल्पसिद्धः सर्वज्ञः सर्वभूतहिते रतः । स्तवराजं जपन्मर्त्यः सुहृद्भिः सह मोदते ॥ स्तवराजजपासक्तभावयुक्तस्य धीमतः । अस्मिञ्जगत्त्रयेप्यस्ति नासाध्यं न च दुष्करम् ॥ तस्मात्सर्वप्रयत्नेन स्तवराजं

CC-0. Narinder Safaya Collection. Digitized by eGangotri

जपेन्नरः । सकृज्जप्त्वा लभेन्मुक्तिं दुःस्वप्नेषु भयेष्वपि ॥ सर्वं तरति पाप्मानं ब्रह्मभूतो भवेन्नरः । तस्मात्संपूजितो ह्येष धर्मकामार्थसिद्धये ॥ स्तवराजमिमं स्तवोत्तमं प्रलपंश्चैव पठन्स्मरन्नपि । कुरुते शुभकर्म मानवः शुभमभ्येति शुभानि चाश्नुते ॥ बहुनात्र किमुक्तेन स्तवराजमिमं जपन् । सर्वं तद्भद्रमाप्नोति यद्यदिच्छति शाश्वतम् ॥ स्तवानामप्यशेषाणां वरिष्ठोयं यतः स्तवः । स्तवराज इति ख्यातिं सर्वलोकेषु यास्यति ॥ श्रीनन्दिकेश्वर उवाच ॥ इत्थमेष स्तवः प्रोक्तः प्रशस्तः शम्भुना स्वयम् । सर्वसिद्धिकरो नृणां सर्वाभीष्टफलप्रदः ॥ तस्मादनेन स्तोत्रेण स्तवराजेन मानवः । स्तवञ्जपन्स्मरन्वापि कुर्वन्निर्वाणमृच्छति ॥ एवं ते कथितं ह्येतत्क्रमेण परिपृच्छतः । विनायकस्य माहात्म्यं प्रतिष्ठार्चनयोर्विधिः ॥ प्रशंसा ब्रह्मगायत्र्याः कल्पस्तस्याश्च शोभनः । उक्तमेतत्परं ब्रह्म किं भूयः श्रोतुमिच्छसि ॥ इति विरचयति स त्र्यम्बकः स्तोत्रमेतद्वरमिभवदनस्य स्वामिनोऽत्यादरेण । गुरुवरचरणाग्रान्मूर्ध्नि कृत्वा वराज्ञां पठितमिह वरेण्यं घोरविघ्नौघशान्त्यै ॥ लाक्षासिन्दूरवर्णं सुरवरनमितं मोदकैर्मोदितास्यं हस्ते दन्तं ददानं दिनकरसदृशं तेजसोग्रं त्रिनेत्रम् । दक्षे रत्नाक्षसूत्रं वरपरशुधरं साखुसिंहासनस्थं गाङ्गेयं रौद्रमूर्तिं त्रिपुरवधकरं विघ्नभक्षं नमामि ॥ नमताशेषविघ्नौघवारणं वारणाननम् । कारणं सर्वसिद्धीनां दुरितार्णवतारणम् ॥ शङ्करजगदम्बिकयोरङ्के पङ्केन खेलन्तम् । लम्बोदरमवलम्बे स्तम्भेरमराजचारुमुखम् ॥ इति श्रीभविष्योत्तर उत्तरखण्डे नन्दिकेश्वरसंवादे गणेशस्तवराजः समाप्तः ॥

---

CC-0. Narinder Safaya Collection. Digitized by eGangotri

# रुद्रपञ्चके चमकानुवाक्यम् ।

ॐ नमः शिवाय । प्रणतोऽस्मि महादेव प्रपन्नोऽस्मि सदाशिव । निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ॥ देवं सुधाकलशसोमकरं त्रिनेत्रं पद्मासनं च वरदाऽभयदं सुशुभ्रम् । शङ्खाऽभयाब्जवरभूषितया च देव्या वामेऽङ्कितं शमनभङ्गहरं नमामि ॥ शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम् । गङ्गाधरं दशभुजं सर्वाभरणभूषितम् ॥ १ ॥ नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् । व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ॥ २ ॥ कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिकम् । ज्वलन्तं पिङ्गलजटाशिखमुद्योतकारिणम् ॥ ३ ॥ अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणम् । दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम् ॥ ४ ॥ दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् । नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमऽव्ययम् ॥ ५ ॥ सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् । एवं ध्यात्वा द्विजः सम्यक्ततो यजनमारभेत् ॥६॥ मृत्युञ्जय महादेव पाहि मां शरणागतम् । जन्ममृत्युजरारोगैः पीडितं भवबन्धनात् ॥ ७ ॥ आराधितो मनुष्यैस्त्वं सिद्धैर्देवैर्महर्षिभिः । आवाहयामि भक्त्या त्वां गृहाणार्चां महेश्वर ॥ ८ ॥ हर शम्भो महादेव विश्वेशामरवल्लभ । शिव शङ्कर सर्वात्मन् नीलकण्ठ नमोस्तु ते ॥ ९ ॥ इति विज्ञाप्य देवेशं जपेन्मन्त्रं च त्र्यम्बकम् ॥ १० ॥ ॐ त्र्यम्बकं यजामहे सुगन्धिं रयिपोषणम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥ ॥ ॐ आत्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैरिह केतुमद्भिर्वाता-



CC-0. Narinder Safaya Collection. Digitized by eGangotri

जवेन बलमद्भिर्मनोजवा यांतु शीघ्रं मम रुद्राय हव्यन्देवानां च ऋषीणां चासुराणां च पूर्वजं सहस्राक्षं विरूपाक्षं विश्वरूपं महादेवं शिवमावाहयाम्यहम् ॥ ॥ आवाहयाम्यहं देवमीश्वरं पार्वतीपतिम् । वृषभासनमारूढं नागाभरणभूषितम् ॥ प्रीयतां यजमानस्य तुष्टो भूयाज्जगत्पतिः । शुक्लवर्णो महातेजाः शुक्लस्रग्दामभूषितः । बलिः पुष्पं चरुश्चैव धूपोऽयं प्रतिगृह्यताम् ॥ ॥ ॐतत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ ३ ॥ ॥ ॐशतरुद्रियन्देवानां रुद्रशमनं भवाय शर्वायश्च प्रत्युत्क्रान्तानुवाकौ देवर्षी रुद्रदैवत्यस्त्रिष्टुप्च्छन्दश्चयने विनियोगः, नमस्ते देवा रौद्रमानुष्टुभमाद्या गायत्री पञ्चमषष्ठ्यौ पांक्त्यन्ता महापंक्तिर्मा भैरेकपदा जगत्यनुष्टुप् त्रिष्टुप् महाबृहती यवमध्या रुद्रो देवता चरुमेष्टिका, अस्य रुद्रस्य प्रश्नस्य अनुष्टुपच्छन्दः अघोर ऋषिः सङ्कर्षणमूर्तिः सुरूपो योऽसावादित्यः परःपुरुषः सएव देवता, अग्निः क्रतुचरुमायामिष्टिकायां शतरुद्रे विनियोगः, सकलस्य रुद्राध्यायस्य श्रीमहारुद्रो देवता एका गायत्री छन्दस्तिस्रोऽनुष्टुभस्तिस्रः पङ्क्त्यः सप्ताऽनुष्टुभौ द्वे जगत्यौ परमेष्ठी ऋषिः । आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थममुककामनासिद्ध्यर्थे चमानुवाकसहितरुद्रमन्त्रपाठे होमे स्नाने पुष्पार्चने वा विनियोगः ॥ ॥ ॐकर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदा रमन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥ ॥ गात्रं भस्मसितं सितं च हसितं हस्ते कपालं सितं खट्वाङ्गं च सितं सितं च वृषभं कर्णे सिते कुण्डले । गङ्गाफेनसितो जटाजल-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

सितश्चन्द्रः सितो मूर्धनि सोऽयं सर्वसितो दधातु विभवं पापक्षयं शङ्करः ॥ ॥

"आशुः शिशान इति शुक्रज्योतिष्मानंशुः प्रजननं सर्वाः प्रजाः कश्यपस्य वाजस्य प्रसवोऽग्नेः" ॥ ॥ ॐआशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ॥ सङ्क्रन्दनेनाऽनिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ।स इषुहस्तैः स निषिङ्गिभिर्वशी संस्रष्टा सयुध इन्द्रो गणेन । संसृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता ॥ बृहस्पते परिधीया रथेन रक्षोहा मित्राँ अपबाधमानः । प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नऽस्माकमेध्यविता रथानाम् ॥ बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः । अभिवीरो अभिषत्वा सहोजिज्जैत्रायनो रथमाऽतिष्ठ गोवित् ॥ गोत्रभिदङ्गोविदं वज्रबाहुं जयन्तमऽज्म प्रमृणन्तमोजसा । इमं स जाता अनुवीरयध्वमिन्द्रसखायमऽनुसंव्ययध्वम् ॥ अभिगोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडऽयुध्योऽस्माकं सेना अवन्तु प्रयत्सु ॥ इन्द्र एषां नेता बृहस्पतिर्दक्षिणो यज्ञः पुर एतु सोमः । देवसेनानामभिभञ्जतीनां जयन्तीनां मारुतो यन्तु मध्ये ॥ इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम् । महामनसां भुवनस्य वानां घोषो देवानां जयतामुदस्थात् ॥ अस्माकमिन्द्रः समृतेषु ध्वजेष्वऽस्माकं या इषवस्ता जयन्तु । अस्माकं वीरा उत्तरे

CC-0. Narinder Safaya Collection. Digitized by eGangotri

भवन्त्वऽस्मान्तु देवा अवता भरेष्वा ॥ "होम पर खडा होके यह आहुति देना" ॥ ॐशुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च सत्यश्चर्तपाश्चात्यँहा ईदृङ् चान्यादृङ्च सदृङ्च प्रतिसदृङ्च मितश्च संमितश्च सभारा ऋतश्च सत्यश्च ध्रुवश्च धरणश्च धर्ता च विधर्ता च विधारय ऋतजिच्च सत्यजिच्च सेनाजिच्च सुषेणश्चान्तिमित्रश्च दूरे अमित्रश्च गण ईदृक्षास एतादृक्षास ऊषुणः सदृक्षासः प्रतिसदृक्षास एतानभितासश्च संमितासो नो अद्य सभारसो मरुतो यज्ञे अस्मिन्निन्द्रं दैवीर्विशो मरुतोऽनु वर्त्मानो यथेन्द्रन्दैवीर्विशो मरुतोऽनु वर्त्मानोऽभवन्नेवमिमं यजमानं दैवीश्च विशो मानुषीश्चानु वर्त्मानो भवन्तु ॥ ॥ ॐनमस्ते रुद्र मन्यवे बाहुभ्यामुत ते नम उत त इषवे नमः । या ते रुद्र शिवा तनूरऽघोराऽपापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताऽभिचाकशीहि । यामिषुङ्गिरिशन्त ! हस्ते बिभर्ष्यऽस्तवे । शिवां गिरित्र ताङ्कुरु माहिंसीः पुरुषं जगत् । शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जगदऽयक्ष्मं सुमना असत् । अध्यवोचदधिवक्ता प्रथमो दैव्योभिषक् । अहींश्च सर्वाञ्जम्भय सर्वांश्च यातुधान्योऽधराचीः परासुव । असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः । ये चेमे रुद्रा अभितो दिक्षु श्रिताः सहस्राक्षो वैषां हेड ईमहे । असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृश्यन्नुतैनमुदहार्यः । उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः । नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये अस्य सत्वानोऽहन्तेभ्योऽकरं नमः । प्रमुञ्च धन्वनस्तमुभयो-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

रात्र्योर्ज्याम् । याश्च ते हस्त इषवः परस्ता भगवो वप । विज्यं धनुः कपर्दिनो विशल्यो बाणवानुत ।१। अनेशन्नस्येषव आभूरस्य निषङ्गथिः । या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयाऽ स्मान्विश्वतस्त्वमयक्ष्मेण परिभुज । परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्निधीहितम् । नमांसि त आयुधायाऽनातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने । अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखं शिवो नः सुमना भव । यात इषुः शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो मृड जीवसे ॥ २ ॥ मानो महन्तमुत मानो अर्भकं मान उक्षन्तमुत मान उक्षितम् । मानो वधीः पितरं मोत मातरं मानः प्रियास्तन्वो रुद्र रीरिषः ॥ १ ॥ मानस्तोके तनये मान आयौ मानो गोषु मानो अश्वेषु रीरिषः । वीरान्मानो रुद्र भामितो वधीर्हविष्मन्तः सदसि त्वा हवामहे ॥ २ ॥ नमस्ते अस्तु भगवः परमेश्वर विश्वश्वर महादेव शिव सशिव सदाशिव त्रिकालकाल कालाग्निरुद्र नीलकण्ठ अमृतेश्वर बहुरूप अघोर तत्पुरुष महामृत्युञ्जय भट्टारक ते नमो नमः ॥ ॥ अग्नाविष्णू सजोषसे इमा वर्धन्तुवां गिरः, द्युम्नैर्वाजेभिरावृतम् ॥ ॥ वाजश्चमे प्रसवश्चमे प्रयतिश्चमे प्रसृतिश्चमे धीतिश्चमे क्रतुश्चमे स्वरश्च मे श्लोकश्चमे श्रावश्चमे श्रुतिश्च मे ज्योतिश्चमे स्वश्चमे प्राणाश्चमे व्यानश्चमे अपानश्चमे असुश्चमे चित्तं चम आधीतंचमे वाक्मे मनश्चमे चक्षुश्चमे श्रोत्रं चमे दक्षश्चमे बलंचम ओजश्चमे सहश्चम आत्माचमे तनू-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

श्चमे शर्म चमे वर्म चमे अङ्गानि चमे अस्थीनि चमे परूंषि चमे शरीराणिचम आयुश्चमे जराचमे ॥ यज्ञेन कल्पताम् ॥ ॥ ॐनमो हिरण्यवाहवे सेनान्ये दिशां च पतये नमो, नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो, नमः शिष्पिञ्जराय त्विषीमते पथीनाम्पतये नमो, नमो बभ्लुषाय व्याधिनेऽन्नानाम्पतये नमो, नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो, नमो भवस्य हेत्यै जगतस्पतये नमो, नमो रुद्रायाऽततायिने क्षेत्राणाम्पतये नमो, नमः सूतायाऽहन्त्याय वनानांपतये नमो नमो रोहिताय स्थपतये वृक्षाणां पतये नमो, नमो मन्त्रिणे वाणिज्याय कक्ष्याणां पतये नमो, नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमः ॥ नम आक्रन्दाय त उच्चैर्घोषाय सत्वानां पतये नमो, नमः कृत्संवीताय धावते पत्तीनां पतये नमः ॥ ॥ अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरावृतम् ॥ ॥ ॐज्यैष्ठ्यंचम आधिपत्यं चमे, मन्युश्चमे भामश्चमे अमश्चमे अम्भश्चमे जेमाचमे महिमाचमे वरिमाचमे, प्रथिमाचमे, वर्ष्मा चमे, द्राघ्वाचमे, वृद्धंचमे, वृद्धिश्चमे, सत्यंचमे, श्रद्धाचमे, जगच्चमे, धनंचमे, क्रीडाचमे, मोदश्चमे, वशश्चमे, त्विषिश्चमे, सूक्तंचमे, सुकृतंचमे, जातंचमे, जनिष्यमाणं चमे, वित्तंचमे, वेद्यंचमे, भूतंचमे, भविष्यं चमे, सुगंचमे, सुपथं चमे, ऋद्धंचम, ऋद्धिश्चमे, क्लृप्तं चमे क्लृप्तिश्चमे, मतिश्चमे सुमतिश्चमे ॥ ॥ यज्ञेन कल्पताम् ॥ ॥ नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो, नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो, नमो वञ्चते परिवञ्चते स्तायूनां

CC-0. Narinder Safaya Collection. Digitized by eGangotri

पतये नमो, नमो निचराय परिचरायाऽरण्यानां पतये नमो, नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो, नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णतां पतये नमो, नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यः प्रकृन्तानां पतये नमो, नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो ॥ नम इषुकृद्भ्यो धन्वकृद्भ्यश्चवो नमो नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमो, नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो, नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमो, नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो, नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो, नमः शयनेभ्य आसीनेभ्यश्च वो नमो, नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो, नमः सभाभ्यः सभापतिभ्यश्च वो नमो, नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो ॥ ॥ अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरागतम् ॥ ॥ ॐशञ्चमे, मयश्चमे, प्रियञ्चमे, अनुकामश्चमे, कामश्चमे, सौमनसश्चमे, भगश्चमे, द्रविणं चमे, भद्रंचमे, श्रेयश्चमे, वस्यश्चमे, यशश्चमे, यन्ताचमे, धर्ताचमे, क्षेमचमे, धृतिश्चमे, संविच्चमे, ज्ञातंचमे, विश्वश्चमे, महश्चमे, सूश्चमे, प्रसूश्चमे, सीरंचमे, लयश्चम, ऋतञ्चमे, अमृतंचमे, अयक्ष्मंचमे, अनामयंचमे, जीवातुश्चमे, दीर्घायुत्वंचमे, अनमित्रं च मे, अभयश्चमे, सुगंचमे, शयनंचमे, सूषाचमे, सुदिनं चमे ॥ यज्ञेन कल्पताम् ॥ ॥ नम आव्याधिनीभ्यो विविध्यद्भ्यश्च वो नमो, नम उगणाभ्यस्तृंहतीभ्यश्च वो नमो, नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो, नमो गणेभ्यो गणपतिभ्यश्च वो नमो, नमः कृच्छ्रेभ्यः कृच्छ्रपतिभ्यश्च वो नमो,

CC-0. Narinder Safaya Collection. Digitized by eGangotri

नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो, नमः सेनाभ्यः सेनानीभ्यश्च वो नमो, नमो रथेभ्यो वरूथिभ्यश्च वो नमो, नमो महद्भ्योऽर्भकेभ्यश्च नमो, नमो युवभ्य आशिनेभ्यश्च वो नमो, नमः क्षुत्तृद्भ्यः संगृहीतृभ्यश्च वो नमो, नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो, नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो, नमः पुञ्जिष्ठेभ्यो निषादेभ्यश्च वो नमो, नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो, नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ॥ ॥ अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरावृतम् ॥ ॥ उर्क्चमे, सूनृताचमे, पयश्चमे, रसश्चमे, घृतं च मे, मधुचमे, सग्धिश्चमे, सपीतिश्चमे, कृषिश्चमे, वृष्टिश्चमे, जैत्रंचम, औद्भिदंचमे, रयिश्चमे, रायश्चमे, पुष्टंचमे, पुष्टिश्चमे, विभुश्चमे, प्रभुश्चमे, पूर्णचमे, पूर्णतरंचमे, कुयवंचमे, क्षितिश्चमे, अन्नंचम, इक्षुश्चमे, व्रीहयश्चमे, यवाश्चमे, माषाश्चमे, तिलाश्चमे, नीवाराश्चमे, श्यामकाश्चमे, अणवश्चमे, प्रियङ्गवश्चमे, गोधूमाश्चमे, मसूराश्चमे, मुद्गाश्चमे, खल्वाश्चमे ॥ ॥ यज्ञेन कल्पताम् ॥ ॥ नमो भवाय च रुद्राय च, नमः शर्वाय च पशुपतये च, नमो नीलग्रीवाय च शितिकण्ठाय च, नमो व्युप्तकेशाय च कपर्दिने च, नमः सहस्राक्षाय च शतधन्वने च ॥ नमो गिरिशाय च शिपिविष्टाय च, नमो मीढुष्टमाय चेषुमते च, नमो ह्रस्वाय च वामनाय च, नमो बृहते च वर्षीयसे च, नमो वृद्धाय च संवृध्वने च, नमोऽग्र्याय च प्रथमाय च, नम आशवे चाऽजिराय च, नमः शीघ्र्याय च शीभ्याय च, नम ऊर्म्याय चाऽवस्वन्याय च, नमो नाद्याय च द्वीप्याय च ॥

CC-0. Narinder Safaya Collection. Digitized by eGangotri

॥ अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभि-
रावृतम् ॥ ॥ अश्मा च मे, मृत्तिका च मे, गिरयश्चमे, पर्व-
ताश्चमे, सिकताश्चमे, वनस्पतयश्चमे, हिरण्यश्चमे, अयश्चमे, सीस-
श्चमे, त्रपुश्चमे, श्यामंचमे, लोहितायसंचमे, अग्निश्चम, आप-
श्चमे, वीरुधश्चम, ओषधयश्चमे, कृष्टपच्यश्चमे, अकृष्टपच्यश्चमे,
ग्राम्याश्चमे, पशव आरण्याश्चमे, वित्तंचमे, वित्तिश्चमे भूतंचमे,
भूतिश्चमे, वसुचमे, वसतिश्चमे, कर्मचमे, शक्तिश्चमे, अर्थ-
श्चम, एमश्चम, इत्याचमे, गतिश्चमे, ॥ ॥ यज्ञेन कल्पताम् ॥
॥ नमो ज्येष्ठाय च कनिष्ठाय च, नमः पूर्वजाय चापरजाय च,
नमो मध्यमाय चाऽप्रगल्भाय च, नमो बुध्न्याय च जघन्याय
च, नमः सोभ्याय च प्रतिसर्याय च, नम आशुषेणाय चाशुर-
थाय च ॥ नमो बिल्मिने च कवचिने च, नमो वर्मिणे च
वरूथिने च, नमः शूराय चावभेदिने च, नमः श्रुताय
च श्रुतसेनाय च, नमो याम्याय च क्षेम्याय च, नम उर्वर्याय
च खल्याय च, नमः श्लोक्याय चावसान्याय च, नमः श्रवाय
च प्रतिश्रवाय च, नमो वन्याय च कक्ष्याय च ॥ ॥ अग्ना-
विष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरावृतम् ॥
॥ अग्निश्चम इन्द्रश्चमे, सोमश्चम इन्द्रश्चमे, सविताचम इन्द्रश्चमे,
सरस्वती चम इन्द्रश्चमे, पूषा चम इन्द्रश्चमे, बृहस्पतिश्चम,
इन्द्रश्चमे, मित्रश्चम इन्द्रश्चमे, वरुणश्चम इन्द्रश्चमे, धाताचम
इन्द्रश्चमे, त्वष्टा चम इन्द्रश्चमे, मरुतश्चम इन्द्रश्चमे, विश्वेदेवा-
श्चम इन्द्रश्चमे पृथिवीश्चम इन्द्रश्चमे, अन्तरिक्षं चम इन्द्रश्चमे,
द्यौश्चम इन्द्रश्चमे, समाश्चम इन्द्रश्चमे, नक्षत्राणि चम इन्द्रश्चमे,

CC-0. Narinder Safaya Collection. Digitized by eGangotri

दिशश्चम इन्द्रश्चमे ॥ ॥ यज्ञेन कल्पताम् ॥ ॥ नमो दुन्दुभ्या-यचाऽहनन्याय च, नमो धृष्णवे च प्रमृशाय च, नमो निषि-ङ्गिणे चेषुधिमते च, नमस्तीक्ष्णेषवे चायुधिने च, नमः सायु-धायच सुधन्वनेच ॥ नमः स्रुत्याय च पथ्याय च, नमः काट्याय च नीप्याय च, नमो नाद्याय च वैशन्ताय च, नमः कुल्याय च सरस्याय च, नमः कूप्याय चावट्याय च, नमो वर्ष्याय चाऽवर्ष्याय च, नमो मेघ्याय च विद्युत्याय च, नमो वीध्र्याय चातप्याय च, नमो वात्याय च रेष्म्याय च, नमो वास्तव्याय च वास्तुपाय च ॥ ॥ अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरागतम् ॥ ॥ अंशुश्चमे, रश्मिश्चमे, दाभ्यश्चमे, अधिपतिश्चम, उपांशुश्चमे, अन्तर्यामश्चम, ऐन्द्रा-वायवश्चमे, मैत्रावरुणश्चम, आश्विनश्चमे, प्रतिप्रस्थानश्चमे, शुक्र-श्चमे, मन्थीचम, आग्रायणश्चमे, क्षुल्लकवैश्वदेवश्चमे, ध्रुवश्चमे, वैश्वानरश्चम, ऐन्द्राग्नश्चमे, वैश्वदेवश्चमे, मरुत्वतीयश्चमे, महे-न्द्रीयश्चमे, सावित्रश्चमे, सारस्वतश्चमे, पत्नीवतश्चमे, हारियोज-नश्चमे ॥ ॥ यज्ञेन कल्पताम् ॥ ॥ नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च, नमः शङ्गवे च पशुपतये च, नम उग्राय च भीमाय च, नमो हन्त्रे च हनीयसे च, नमोऽग्रेवधाय च दूरेवधाय च, नमो वृक्षेभ्यो हरिकेशेभ्यो, नमस्ताराय, नमः शम्भवे च मयोभवे च, नमः शङ्कराय च मयस्कराय च ॥ नमः शिवायच शिवतराय च, नमः किंशल्याय च क्षय-णाय च ॥ ॥ अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरागतम् ॥ ॥ इध्मा च मे, स्रुचश्चमे, चमसश्चमे,

CC-0. Narinder Safaya Collection. Digitized by eGangotri

वायव्यानि च मे, द्रोणकलशश्चमे, पूतभृच्चमे, अपूतभृच्चमे, ग्रावाणश्चमे, अधिषवणश्चमे, अवभृथश्चमे, स्वगाकारश्चमे ॥ ॥ यज्ञेन कल्पताम् ॥ ॥ नम इरिण्याय च प्रपथ्याय च, नमः पुलस्तिने च कपर्दिने च, नमो गोष्ठ्याय च गृह्याय च, नमस्तल्प्याय च गेह्याय च, नमः पर्यायचावर्याय च, नमः प्रतरणाय चोत्तरणाय च, नमस्तीर्थ्याय च कुल्याय च, नमः फेन्याय च शष्प्याय च, नमः सिकत्याय च प्रवाह्याय च, नमो हृदय्याय च निवेष्प्याय च, नमः काट्याय च गह्वरेष्ठ्याय च, नमः शुष्क्याय च हरित्याय च, नमो लोप्याय चोलप्याय च, नमः पांसव्याय च रजस्याय च नमः सूर्म्याय चोर्म्याय च, नमः पर्ण्याय च पर्णशादाय च, नम आखिदते च प्रखिदते च, नमोऽभिघ्नते चापगुरमानाय च, नम आखिदाय च विखिदाय च नमो वः किरिकेभ्यो देवानां हृदयेभ्यो, नमो विचिनुत्केभ्यो, नमो विक्षीणकेभ्यो नम आनिर्हतेभ्यः ॥ ॥ अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरावृतम् ॥ अग्निश्चमे, घर्मश्चमे, अर्कश्चमे सूर्यश्चमे, प्राणश्चमे, अश्वमेधश्चमे, पृथिवीचमे, दितिश्चमे, अदितिश्चमे, द्यौश्चमे, शक्करीरङ्गुलयो दिशश्चमे, यज्ञेन कल्पतां, व्रतं चर्तुश्च संवत्सरश्च तपश्चाहोरात्र, ऊर्वष्ठीवे बृहद्रथन्तरश्चमे ॥ ॥ यज्ञेन कल्पताम् ॥ ॥ द्रापे अन्धसस्पते दरिद्र नीललोहित, आसां प्रजानामेषां पुरुषाणामेषां पशूनां माभैर्मा रुङ्मा नः किञ्चनाऽममत्, इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथा नः शमऽसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे असिन्ननातुरम् । या ते रुद्र

CC-0. Narinder Safaya Collection. Digitized by eGangotri

शिवा तनूः शिवा विश्वाहभेषजीः, शिवारुद्रस्य भेषजी तया नो मृड जीवसे । परि णो रुद्रस्य हेतिर्वृणक्तु परित्वेषस्य दुर्मतेरघायोः, अवस्थिरा मघवद्भ्यस्तनुषु मीढ्वस्तोकाय तनयाय मृड । मीढुष्टम शिवतम शिवो नः सुमना भव, परमेवृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकम् । बिभ्रदुच्चर विकिरिळ विलोहित नमस्ते अस्तु भगवः, यास्ते सहस्रं हेतयोऽन्येऽस्मन्निव पान्तु ताः ॥ ॥ अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरागृतम् ॥ ॥ गर्भाचमे, वत्साचमे, त्र्यविश्चमे, त्र्यवी चमे, दित्यवाट् चमे, दित्यौहीचमे, पञ्चाविश्चमे, पञ्चावीचमे, त्रिवत्साश्चमे, त्रिवत्सश्चमे, तुर्यवाट्चमे, तुर्यौहीचमे, पष्ठवाट्चमे, पष्ठौहीचम, उक्षाचमे, वशाचमे, अनड्वांश्चमे, धेनुश्चम, ऋषभश्चमे, वेहच्चमे ॥ ॥ यज्ञेन कल्पताम् ॥ ॥ सहस्रधा सहस्राणि हेतयस्तव बाह्वोः, तासामीशानो भगवः पराचीना मुखाकुरु ॥ असंख्याताः सहस्राणि ये रुद्रा अधिभूम्याम्, तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १ ॥ येऽस्मिन्महत्यऽर्णवेऽन्तरिक्षे भवा अधि, तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ २ ॥ ये नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपाश्रिताः, तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३ ॥ ये नीलग्रीवाः शितिकण्ठाः शर्वा अधःक्षमाचराः, तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४ ॥ ये वनेषु शिष्पिञ्जरा नीलग्रीवा विलोहिताः, तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥५॥ येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्, तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६ ॥ ये भूतानामधिपतयो विशि-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

खासः कपर्दिनः, तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥७॥ ये पथीनां पथि रक्षय ऐड मृदाय व्युधः, तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ८ ॥ ये तीर्थानि प्रचरन्ति सृकावन्तो निषिङ्गिणः, तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥९ ॥ य एतावन्तो वा भूयांसो वा दिशो रुद्रा वितिष्ठिरे, तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १० ॥ ॐनमो अस्तु रुद्रेभ्यो ये दिवि, येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु, ते नो मृडयन्तु, ते यं द्विष्मो यश्चनो द्वेष्टि तमेषां जम्भे दध्मः ॥ १ ॥ ॐनमो अस्तु रुद्रेभ्यो ये अन्तरिक्षे, येषां वातमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु, ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥२॥ ॐनमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषामऽन्नमिषवस्तेभ्यो, दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ ३ ॥ ॥ अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरावृतम् ॥ ॥ एकाचमे, तिस्रश्चमे, तिसृश्चमे, त्रयस्त्रिंशच्चमे, चतस्रश्चमे, अष्टौचमे, अष्टचमे, अष्टाचत्वारिंशच्चमे, वाजश्च, प्रसवश्चाऽपिजश्च क्रतुश्च वाक्पतिश्च वसुश्च स्वमौर्धो मूर्ध्वा वैयशनो व्यश्नान आन्त्योऽन्त्यो भौवनो भुवनस्य पतिः प्रजापतिरधिपतिरियन्ते राण्मित्रो यन्तासि यमन ऊर्जेत्वा वृष्टयै त्वा प्रजानां त्वाऽधिपत्याय, आयुर्यज्ञेन कल्पतां, मनो यज्ञेन कल्पतां, प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां, श्रोत्रं

CC-0. Narinder Safaya Collection. Digitized by eGangotri

यज्ञेन कल्पतां, वाग्यज्ञेन कल्पतामाऽऽत्मा यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पतां, पृष्ठं यज्ञेन कल्पतां, यज्ञो यज्ञेन कल्पताम् ॥ ऋक्च सामश्च स्तोमश्च यजुश्च बृहद्रथन्तरश्च स्वर्देवा अगन्म प्रजापतेः प्रजा अभूवन्नऽमृता अभूम वेट्स्वाहा ॥ ॥ "वाजस्य नु प्रसवा इति षट्" ॥ ॥ ॐ विश्वे अद्य मरुतो विश्व ऊतीर्विश्वे भवन्त्वऽग्नयः समिद्धाः । विश्वे मादेवा अवसा गमन्निह विश्वमस्तु द्रविणं वाजे अस्मिन् । अ[1] मा वाजस्य वाजे[2]स्यनु वाजो मा सप्त प्रदिशश्चतस्रो वा परावतः। वाजो मा विश्वैर्देवैर्धनसाता इहावतु, वाजो मे अद्य प्रसुवातिदानं वाजो देवा नृहविषा वर्धयाति, वाजस्य हि प्रसवेनान्नमिति विश्वा आशा वाजपतिर्जयेयम्, वाजः पुरस्तादुत मध्यतो नो वाजो देवानृतुभिः कल्पयाति, वाजस्य हि प्रसवेनान्नमेति सर्वा आशा वाजपतिर्भवेयम् ॥ सं मा सृजामि पयसः पृथिव्याः सं मा सृजाम्यद्भिरौषधीभिः सोहं वाजस्य नौम्यग्नेः ॥ ॥ "तेजोसि ॥" पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ तर्पणम् ॥ मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां विधाय । भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैः ॥ नित्यं दण्डी नित्ययज्ञोपवीती नित्यं ध्याता भस्मना कर्मबन्धी । हृद्रं दृष्ट्वा देवमी-

---

१ आधुनिकैः कतिभिरन्विष्टः पाठोयम् ॥ ॥ आ मा वाजस्य प्रसवो जगम्यादऽमा द्यावापृथिवी विश्वरूपे । आ मा गन्तां पितरा मातरा चा मा सोमो अमृतत्वेन गम्यात् ॥ २ ॥ वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे । यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्मसाविषत्.

CC-0. Narinder Safaya Collection. Digitized by eGangotri

शानमुग्रं याति स्थानं तेन साकं तदीयम् ॥ अनेन मन्त्रपाठेनात्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थममुककामनासिद्ध्यर्थं, भगवान्, भवो देवः ८ शतरुद्रेश्वरः, मृत्युञ्जयभट्टारकः पार्वतीसहितः परमेश्वरः प्रीयतां प्रीतोऽस्तु ॥

( विस्तीर्णतर्पणम् ) नमस्ते रुद्र इत्येतत्सर्वोपद्रवनाशनम् । सर्वशान्तिकरं प्रोक्तं महापातकनाशनम् ॥ रक्षोघ्नं च यशस्यं च लक्ष्म्यायुःपुष्टिवर्धनम् । अध्यवोचदित्यनेन रक्षा स्याद्व्याधितस्य च ॥ सिद्धार्थकानां क्षेपेण पथि चैतत्सदा पठेत् । क्षेमेण स्वगृहानेति सर्वबाधाविवर्जितः ॥ असौ यस्ताम्र इत्येतत्पठेन्नित्यं दिवाकरम् । उपतिष्ठेत धर्मज्ञः सायं प्रातरतन्द्रितः ॥ अन्नमक्षयमाप्नोति दीर्घमायुश्च विन्दति । प्रमुञ्च धनुरित्येतत्षड्गिरायुधमन्त्रणम् ॥ रिपूणां भङ्गदं युद्धे नात्र कार्या विचारणा । मा नो महन्त इत्येतद्बालानां शान्तिकारणम् ॥ नमो हिरण्यबाहवेऽनुवाकैः षड्भिरेव च । राजिकांस्तिलतैलाक्ताञ्जुहुयाच्छत्रुनाशनम् ॥ नमो वः किरिकेभ्यश्च हुत्वा पद्मलक्षं नरः । राज्यलक्ष्मीमवाप्नोति नात्र कार्याविचारणा ॥ बिल्वानां लक्षहोमेन कनकं बहु विन्दति । इमा रुद्रायेति तिलैः कृत्वा होमं विचक्षणः ॥ शीघ्रमेव महाभाग धनमाप्नोत्यचिन्तितम् । अनेनैव च मन्त्रेण दूर्वाहोमेन मानवः ॥ सर्वव्याधिविनिर्मुक्तो भयान्सर्वान्व्यपोहति । जटारोहेण चेध्मानां या ते रुद्र शिवा तनूः ॥ हुत्वाऽयुतं च धर्मज्ञः पुत्रं प्राप्नोत्यभीप्सितम् । असङ्ख्याताः सहस्राणि मन्त्रैः स्यादाभिचारिकम् ॥ नमोस्तु [illegible]भ्य इति प्रोक्ता प्रत्यङ्गिरा परा । पाठमात्रं पठेन्नित्यं रुद्रा-

CC-0. Narinder Safaya Collection. Digitized by eGangotri

ध्यायस्य मानवः ॥ सर्वदुःखविनिर्मुक्तः सर्वसम्पत्समन्वितः ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ॥ इह लोके
तथा चान्ते रुद्रलोकं स गच्छति ॥ अनेन मन्त्रपाठेनात्मनो
वाङ्मनःकायोपार्जितपापनिवारणार्थममुकक्कामनासिद्ध्यर्थं भग-
वान्भवो देवः ८ अघोरः तत्पुरुषः सद्योजातः वामदेवः असुर-
बलहा ईशानः बहुरूपः विश्वरूपः त्र्यम्बकः त्रिनेत्रः त्रिशूल-
हस्तः महामृत्युञ्जयभट्टारकः शतरुद्रेश्वरः वृषभवाहनः सानु-
चरः सपरिवारः पार्वतीसहितः परमेश्वरः प्रीयतां प्रीतोऽस्तु ॥
इति चमकानुवाकम् ॥



CC-0. Narinder Safaya Collection. Digitized by eGangotri